खौः सुरेशोऽग्निरीशोऽर्को(र्कः) खं व्योम च खमिन्द्रियम् ॥ २२ ॥

---

१ क. औः वायुः वानरो । २ घ. सुतः । ३ घ. रमा । ४ क. ख. कुक्कुरो ।

खः प्रागुक्तोऽथ गः प्रीतो भवः श्रीपतिरुत्तमः ।
गा क्ष्मोमा[1] च रमा गिर्धीर्गीः श्रीमानथ बुद्धिमान् ॥ २३ ॥
गीर्वाणी गीः सुरा पत्नी सुधा गुः प्राण आसवः ।
गुः कान्तिर्मदनो भीरुर्गूश्च सेतुः सखा रविः ॥ २४ ॥
गुरुः पुरीषं गूः श्वादो गेः पापी जनवञ्चकः ।
गैः पलाशोऽप्यशोकोऽग्निः सूर्यो गोर्द्विपदः करी ॥ २५ ॥
गोर्वज्रं गौः प्रभा भूमिर्वाणी तोयं त्रिविष्टपम् ।
धेनुर्बस्तो वृषो दिग् गौर्नेत्रं लज्जा गुरू रमा ॥ २६ ॥
इन्द्रियं श्रीरुमा गं च वादित्रं शरणं वरम् ।
गः प्रागुक्तोऽथ घः सूनुर्वह्निः पूषा नृपो गजः ॥ २७ ॥
घा रमा च शची दुर्गा भूमिर्घिर्धृतधर्मकः ।
घीः कुमारोऽमराचार्यो घुर्मूढोऽकरुणः फणी ॥ २८ ॥
घूर्भूमिर्घूः सुराधीशो गुंदः[2] सङ्कर्षणोऽमलः ।
घेः शङ्खः कुर्कुरः कीलो घैः सूर्यः सरमासुतः ॥ २९ ॥
घोर्घोषो घौः सुरावासः पाप्मा घं पापमुच्यते ।
घः प्रागुक्तोऽथ ङः प्राणस्तुरगो ङा धरा रमा ॥ ३० ॥
ङिर्बीभत्सुर्नृगः सूक्ष्मो ङीर्भूपः कृकलासपः ।
ङुः सूकरोऽथ ङूर्व्याघ्रो ङेः सूतो ङैः परासरः ॥ ३१ ॥
ङोश्च सिंहोऽथ ङौः सूर्योऽरुणो वह्निः कलानिधिः ।
ङं वितानं सुखं ब्रह्म[3] सर्पिस्तोयं विषं पयः ॥ ३२ ॥
ङः प्रागुक्तोऽथ चश्चञ्चुश्चारणोऽर्चिर्मूखो रविः ।
चा कैर्द्रूरदितिः[4] कन्या चिः पूषा माष एव च ॥ ३३ ॥
चीर्मर्षिर्दन्तिपत्नी स्याच्चुः कालोऽथ पविः शरः ।

---

१ क. ख. क्ष्मा मा. । २ क. गुन्द. । ३ घ. वा स्यात् । ४ ख. कद्रूर॰ ।

भीरुश्चूर्मार्गणोऽपि[1] स्यात् पक्षी भूमिजराड् रविः ॥ ३४ ॥
चेः कृष्णोऽर्कस्तुराषाड् वा चैः सोमो विनतासुतः ।
चोः पाषण्डी च चौर्धेनुरनड्वानऽग्निरुद्धतः ॥ ३५ ॥
चं चरित्रं सुखं दुःखं कश्मलं भ्रमणं पयः ।
चः प्रागुक्तोऽथ छः सोमः छा च रुट् छिः कुलालकः ॥३६॥
छीश्छविश्छुः शुकः छूर्भूः छेः पाशी छैः सुरालयः ।
छोः पूर्णोऽलङ्कृतो वायुः छौः समीरस्तरुर्नगः ॥ ३७ ॥
छमर्चिर्भूतलं स्वः स्यात् कूटं कूलं मुखं कुलम् ।
छः प्रागुक्तोऽथ जो जारो जा योनिर्जिः सदाशिवः ॥३८॥
जीर्जिष्णुः करुणो यूका जुर्विष्णुर्जूः कुलालजः ।
जेः शुनीजोऽथ जैः पूषा वह्निर्जोः कमलासनः ॥ ३९ ॥
जौर्जारोऽजो युवा जं च जातं रजतमेव च ।
जः प्रागुक्तोऽथ झो हस्तो झा योनिर्झिः कला कपिः ॥४०॥
झीः करी झुर्भृगुर्झूश्चध्रुवः सङ्घोऽमरोऽरुणः ।
झेश्चर्मकृद् भवः सोमो रोमो[2] रामोऽथ झैर्गुरुः ॥ ४१ ॥
झोः कर्णो झौः स्मृतो नाको झं मैथुनमिति स्मृतम् ।
झः प्रागुक्तोऽथ ञः श्वाऽऽग्निर्ञा जरा राशिरेव च ॥ ४२ ॥
ञिः सम्राड् ज्ञानवृद्धोऽग्निर्ञीः पाषण्डी सुराप्रियः ।
ञुः सुनेत्रा ञूः सुवासा ञेः कार्त्तस्वरसन्निभः ॥ ४३ ॥
ञैः कृष्णा ञोः पलाशः स्यात् ञौर्गौः पाषण्डवाक् करी ।
पूर्वा ध्रुवा च ञं सर्पिः परं ब्रह्म निगद्यते ॥ ४४ ॥
ञः प्रागुक्तोऽथ टः प्लीहा मूत्रकृच्छ्रोऽथ पिप्पलः ।
टा सूपा टिः करेणुर्भूः सरमा टीर्धराधरः ॥ ४५ ॥

---

१ घ. र्णो मलः । २ घ. रोमा ।

टुः कङ्कणोऽथ चूडः स्यात् टूर्ननन्दा स्वसा च भीः ।
टेः काणष्टैर्द्विडऽन्धः स्यात् टैः प्रोतो[1] नभसी (?)हयः ॥ ४६ ॥
टोः परेतो गुरुः शिष्यो टौर्विनीतो दवो वृषः ।
टं नेत्रं श्रवणं पात्रं भ्रमणं स्मरणं तथा ॥ ४७ ॥
टः प्रागुक्तोऽथ ठः सूनुर्ज्ञानी मध्वरिरेव च ।
वाचालः शून्य आसारः ठा शून्या नासिकेत्यपि ॥ ४८ ॥
ठिः कुमारोऽमराराातिष्ठीः कुटुम्ब्यथ पुत्रवान् ।
ठुः कदम्बो यमस्त्वष्टा ठूः प्रेज्ञा[2] धृतिरेव च ॥ ४९ ॥
ठेः समासोऽपि ठैर्व्यासष्ठोः समः ठौश्च गौतमः ।
ठं ज्ञानं विवरं शून्यममृतं शारदं पयः ॥ ५० ॥
ठः प्रागुक्तोऽथ डः सार्थो डा क्षमा च सरमा रमा ।
डिर्गौरी डीः शिवा धात्री डुश्चन्द्रो डूः कलापवान् ॥ ५१ ॥
डेर्धर्म्मो डैर्वृषोऽकर्णो डोः पापी पुरुषाधमः ।
डौर्धेनुश्च करो जारो डं नेत्रं च पयस्तथा ॥ ५२ ॥
डः प्रागुक्तोऽथ ढः श्वादः श्वा मार्जारस्तथा खरः ।
ढा नाभिर्ढिर्गुदो मेढ्रो ढीर्धूमो वह्निरुत्कटः ॥ ५३ ॥
ढुः कूर्मः शूकरो व्यालो ढूः कुचो ढेः कुरङ्गजः ।
ढैर्मारो ढोः सुखी वर्यो ढौर्भूमिर्ढं पयो वरम् ॥ ५४ ॥
ढः प्रागुक्तोऽथ णो नक्रो णा नाभिर्णिर्वृकोऽजरः[3] ।
णीः स्वर्गो णुः करेणुर्भूर्णूः कालिन्दी सैटा[4] जरा ॥ ५५ ॥
णेर्मार्जारो विडङ्गश्च णैः शृगाली हरीतकी ।
णोः सर्षपोऽथ णौर्माया णं दर्शनमिति स्मृतम् ॥ ५६ ॥

---

१ घ. प्रेतो । २ क. ख. प्रजा । ३ क. ख. ०कोद्गरः, ग. ०कोङ्गरः ।
४ घ. जटा ।

तः सुवेषोऽथ ता नारी तिर्भूषक उमेश्वरः ।
तीर्नदी जलधिः प्रोक्तस्तुः सारङ्गो रमेश्वरः ॥ ५७ ॥
तूर्म्लेच्छस्तेः करी नक्रस्तैः कलापी दितिप्रसूः ।
तोः सूर्यो विघ्नकृत् स्वामी तौः स्वर्गो भूस्तथा गरः ॥ ५८ ॥
आचार्यो यजमानश्च तं तृणं जलमेव च ।
तः प्रागुक्तोऽथ थः सूर्यो गणेशो विनतासुतः ॥ ५९ ॥
था धरित्री प्रभा गङ्गा थिर्गोदा यमुना तथा ।
थीः समुद्रो व्रणो रेवा थुः साक्षी थूः परासरः ॥ ६० ॥
थेर्व्यासः थैः शुकः प्रोक्तः थोर्धर्मो गाधिपुत्रकः ।
थौः शङ्खः थं विषं कर्म बहुलं सूक्ष्ममेव च ॥ ६१ ॥
थः प्रागुक्तोऽथ दो दाता दा दात्री धरणी शुभा ।
दिर्दानी दीः सुधानाथो दुर्दरिद्री करोऽवरः ॥ ६२ ॥
दूर्दुःखी देः स्मृता जाया दैर्मत्स्यो वामनर्षभः ।
दोर्हस्तश्चरणः शिक्षो दौः स्वर्गः प्राण आत्मजः ॥ ६३ ॥
दं दानं शरणं कर्म भव्यं न्यूनमकिल्बिषम् ।
दः प्रागुक्तोऽथ धो धाता विष्णुर्वा गिरिजात्मनः ॥ ६४ ॥
धा धरित्री रमा गौरी धिर्धर्मो धीर्वृकोऽसुरः ।
धुस्तनुर्धूः करो भारो धूर्वृषो धेश्च रावणः ॥ ६५ ॥
धोः पापी वृषणः पूषा धौर्धर्मः पृथिवी गिरा ।
धं धनं धूननं दानं धारणं करणं सुखम् ॥ ६६ ॥
धः प्रागुक्तोऽथ नोऽभावो ना पुमान् गरिमा तथा ।
निर्दुर्गतिश्च नी रागो नुर्देहो नूः कलत्रवान् ॥ ६७ ॥
नेः समो नैः कुरङ्गोऽग्निर्नौस्तरिः पुरुषोऽमरः ।
नं नेत्रमञ्जनं श्रोत्रं करणं कारणं सुखम् ॥ ६८ ॥

नः प्रागुक्तोऽथ पः पापी पूषा वृषण आत्मजः ।
पा पर्णा पिः पवित्रोऽग्निः पीः स्मृताऽथ पिपीलिका ॥६९॥

पुः पुत्रे पूः पुरं देहः पेः पेशी पैश्च गालवः ।
पोः पौत्रः पौः पुमान् भूमिः पं प्रीणनमृणं पयः ॥ ७० ॥

पः प्रागुक्तोऽथ फो माथः फा फूत्कारवती विषा ।
फुः कार्त्तिकोऽथ फूः सर्पो वासवः शरणागतः ॥ ७१ ॥

फेः फाल्गुनोऽथ फैः शङ्खः फोः कालः फौः फणीश्वरः ।
गर्गो द्रोणो रणो बाणः फं फल्गु चारु वा स्मृतम् ॥ ७२ ॥

फः प्रागुक्तोऽथ बो बिम्बो बा स्मृता नर्मदासरित् ।
बिः पूर्णो बीर्बद्धः पादो बेः साक्षी बैः कणो रणः ॥ ७३ ॥

बोः प्राणो बौः सरिद्गङ्गा बं बलं बहुलं स्मृतम् ।
बः प्रागुक्तोऽथ भः सोमो भा कान्तिर्मदिरेन्दिरा ॥ ७४ ॥

भिः पत्नी भीश्च भीतिः स्याद् भुर्भुजङ्गोऽथ भूर्मही ।
जाता जातश्च भेः कान्तिर्भैर्ब्रह्मा वरुणो यमः ॥ ७५ ॥

भैः प्रहारोऽथ भीरुः स्याद् भोः कंसो भौ रमापतिः ।
भं नक्षत्रं भयं ब्रह्म भरणं धरणं पयः ॥ ७६ ॥

भः प्रागुक्तोऽथ मः स्तोमः सोमो रामो रणो गजः ।
मा जालन्ध्री व्यथा लक्ष्मीर्माता माः मास ईरितः ॥ ७७ ॥

मिः कर्णो मीर्महाबाहुर्मुर्माता मूर्महाबलः ।
मेः सारङ्गोऽथ मैः पूषा सारथिः प्रणतो वरः ॥ ७८ ॥

मोः पत्नी मौः सुरावासो मं गलं मलिनं पलम् ।
मः प्रागुक्तोऽथ यः पुञ्जोऽसु देवी सूनुरीश्वरः ॥७९॥

या योनिर्यिश्च सङ्ग्रामो यीर्गजः सारथिर्द्रुमः ।
युः सप्पों यूः स्मृता यूका येः सार्थो यैश्च वासवः ॥ ८० ॥

योः पादो यौः कणः स्वर्गो यं यन्त्रं करणं मधु ।
यः प्रागुक्तोऽथ रः कामो वह्निः सूर्योऽथ तोयधिः ॥ ८१ ॥
रा लक्ष्मीः रा समृद्धिः स्याद् रिः कर्पूरो महेश्वरः ।
रीः कामी मृगपत्न्यग्नी[1] रुर्मृगो रूः प्रजापतिः ॥ ८२ ॥
रेः खेदो वापि-सम्बुद्धी रैः कृष्णो वर्ण उच्यते ।
रो रोषो रौर्भवः स्वर्गो रं रत्नं रोदनं धनम् ॥ ८३ ॥
रः प्रागुक्तोऽथ लश्चौरो लक्ष्मणो ललना च ला ।
लिः सर्पो लीर्धरा लुर्भूर्लू रुद्रो गरुडोऽरुणः ॥ ८४ ॥
लेर्लवो लैः कुशो रामो लोर्मत्स्यो लौः प्रजापतिः ।
लं लक्षणं सुखं नाम रक्षः श्रोत्रं वचो विषम् ॥ ८५ ॥
लः प्रागुक्तोऽथ वः पङ्गुः सुखी वा त्रिदशप्रसूः ।
विः पक्षी गरुडः सूर्यो जलधिः सोम उच्यते ॥ ८६ ॥
वीर्विष्णुर्वुः पदातिः स्याद् वूः सङ्गो गज उच्यते ।
वेः पारिजातो वैः सारो वोः कालो वौः सुखावहः ॥ ८७ ॥
वं सुखं वसनं रक्तं वपुर्वचनमासुरम् ।
वः प्रागुक्तोऽथ शः शम्भुः शा गौरी कमलालया ॥ ८८ ॥
शिः पक्षी श्यथ सौभाग्ये शिशुः शुः शार्करोऽचलः ।
शूः शूद्रः शेः शिरीषोऽगः शैः स्मृतो धंधुहा नृपः ॥ ८९ ॥
शोर्दोषः शौः शिशुः शङ्खः शं सुखं शरणं वपुः ।
शः प्रागुक्तोऽथ षः खङ्गो वह्निः सूर्यो रणः कणः ॥ ९० ॥
परिखा षा खरी शावा षिः शङ्खो वर्तुलः स्मृतः ।
षीः पुत्रः षुः खुरः पुरः षूः सोमो म्लेच्छ एव च ॥ ९१ ॥
षेः सार्थः षैः खरः पारः षोर्देहो मलिनो जनः ।
षौः खट्वा धरणी बुद्धिः षं सस्यं मधु धारणम् ॥ ९२ ॥

---

१ क. ख. नृपपत्न्यग्नी ।

षः प्रागुक्तोऽथ सः सूर्यः सा सीता सिः सखाऽमरः ।
सीः सुखी सुः कुठारोऽर्कः सूर्धरा गर्भिणी नरी ॥ ९३ ॥
सेः सारः सैः शुकः श्वादः सोः सोमः सौः सहोदरः ।
सं सुखं शरणं कार्यं प्रधानं सरणं वरम् ॥ ९४ ॥
सः प्रागुक्तोऽथ हो हर्षो हिरण्याक्षोऽथ तस्करः ।
हा गन्धर्वोऽथ हिः सर्पो हीर्नरो हर्षवान् मृगः ॥ ९५ ॥
हुः स्मृतो नैघुषो राजा हूर्विप्रो हेः प्रसादकृत् ।
हैर्हंसो होश्च सम्बुद्धिर्हौर्विरञ्चिः षडाननः ॥ ९६ ॥
हं चौर्यं हरणं पूर्णं भासुरं भरणं भरम् ।
हः प्रागुक्तः स्मृतं ळं तु परं ब्रह्म सनातनम् ॥ ९७ ॥
क्षः क्षान्तः क्षा मही सीता क्षिर्ज्योतिः क्षीर्हुताशनः ।
क्षुः क्षुद्रो वासवोऽर्कः(र्कश्च ?) क्षूः पापिष्ठः प्रणाशनः ॥९८॥
क्षेः कर्षुकोऽथ क्षैर्मूर्खो जारः क्षोः क्षुरको व्रणः ।
क्षौः खञ्जो धरणी धर्त्ता क्षं क्षेत्रं क्षं पयो मधुः ॥ ९९ ॥
क्षः प्रागुक्त इयं माला शाब्दी सौभरिणा कृता ।
सा श्रुताऽङ्गिरसा चाऽस्तु विद्वच्चेतःप्रसादनी ॥ १०० ॥

इति श्री सौभरिकृता एकाक्षरनाममाला सम्पूर्णा ॥ [३]

*

---

१ ख. गमनं । २ ख. नहुषो ।

[४] सौभरिकृतो द्व्यक्षरकाण्डः ।

क्वणितं परमं ब्रह्म धीमहि प्रणताः सदा ।
ध्यात्वा प्रकाश्यंते [1]माला सर्वज्ञानविधायिनी ॥ १ ॥

क्वणः कणः **क्वणा** धरा **क्विणि**र्धीः **क्वणुः** पुत्रः **क्वणू**र्हुताशनः ।
[2]**क्वणौः** कलापी स्मृतिः **क्वणं** तु वृक्णं साधुसमीरितम् ॥ २ ॥

क्तः सिक्तो वरुणोऽपि **क्तः क्ता** दुर्गा मातृका गिरा ।
क्तिः सूर्यः **क्ती** स्मृतो वह्निः **क्तुः** सूनुः सोम एव च ॥३॥

क्तौर्लक्ष्मीः **क्तं** वरं ज्योतिः **क्थः** सङ्घो हरिणो गजः ।
क्था मही सरमा दुर्गा **क्थिः** कृष्णो वरुणो वरः ॥ ४ ॥

क्थी शिवः **क्थुः** सुतस्तातः [3]**क्थूः** शङ्खो गरुडो नरः ।
[4]**क्थेः** [5]सूतो वरुणो मारो रवः **क्थौः** सरमासुतः ॥ ५ ॥

क्थं रित्थं(क्थं?) [6]कथनं दुःखं दैन्यं **क्नः** कर्ण उत्सवः ।
क्ना रमोमा मही भित्तिः **क्निः** सूकर उरुक्रमः ॥ ६ ॥

क्नुः शिवोऽर्कोऽम्बुधिः शूद्रोऽमरः **क्नूः** पतिरात्महा ।
क्नं श्रोत्रं करणं भीमं **क्मः** कामः कमलाहितः ॥ ७ ॥

क्मा रतिः कामपत्नी स्यात् **क्मिः** कामी **क्मी** रतीशवान् ।
क्मुर्बभ्रुः **क्मूः** स्वभूः शङ्खः शूकरः **क्मौः** कज्जालया ॥ ८ ॥

क्मं कर्म **क्यः** पलाशोऽग्निरर्कः **क्या** रेणुरुच्यते ।
ख्यः खरोऽग्निः खरी **ख्या** स्याद् **ग्यो** [7]गर्गः कमलासनः ॥९॥

ग्या योनिर्घ्यः स्वनो [8]घूको **घ्या** पत्नी धरणी स्मृता ।
च्यश्चयश्चातुरी **च्या** स्यात् **छ्यः** छागः **छ्या** च भारती ॥१०॥

---

१ क. नाममालाज्ञानविधायिनी । २ क. क्णो । ३ ख. ग. क्थुः । ४ ख. ग. क्थूः । ५ क. सुतो । ६ क. ग. कथनं । ७ क. ग. गार्ग्यः । ८ ख. मूको ।

ज्यो जयो यजमानश्च ज्या जया[1] विजया रमा ।
झ्यो नदो झ्या नदी प्रोक्ता ट्यः कूटः ट्या धरा सुरा ॥११॥

ठ्यो नाददोऽनलो ठ्या द्यौः ड्यो दाडिमतरुः करः ।
ड्या रमा नर्मदा गङ्गा ढ्य आढ्यः शिशुरुत्करः ॥ १२ ॥

ढ्या मही ण्यः स्मृतोऽग्रण्यः शरण्यो ण्या नदी गिरा ।
त्योऽन्त्यजः कमलानाथो गुरुस्त्या धरणी नदी ॥ १३ ॥

थ्यो नाथः थ्या कथा द्योऽब्धिर्द्या दया द्यौस्त्रिविष्टपम् ।
ध्योऽन्धो ध्याऽन्धा क्षुधा शुद्धा न्यो नयोऽर्णव उज्ज्वलः ॥१४॥

न्या नीतिर्नेतिरुग्राणी प्यः पयः प्या कृपा रुचिः ।
फ्यः फेनः फ्या फणा ब्योऽर्को ब्याऽम्बा[2] भ्यो भ्याऽभयः पुमान् ॥१५॥

म्यो मयो यम ईशानो म्या रमा सरमा क्षमा ।
य्यो जय्यो विबुधाधीशो य्या शय्या ल्योऽय उद्धतः ॥१६॥

ल्याऽहल्या नलिनी व्योऽब्धिर्वयः पक्षी च कूबरः ।
व्यो वायुर्व्याल ईशानो व्या भव्या वडवा सुधा ॥ १७ ॥

श्य आश आशयो नारी श्या वेश्या कृषिरित्यपि ।
ष्यः प्रेष्यः ष्या सुरा शुद्धा स्यः प्रशस्योऽमराधिपः ॥ १८ ॥

स्या कृषिः कृषिदैवं च ह्यो हयो ह्या तुरङ्गमा ।
ल्ल्या सर्वजगदम्बा च सर्वेशानी सूरेश्वरी ॥ १९ ॥

क्यं कार्यं च ख्यमाकाशं सख्यं ग्यं गम(ग)नं गतम् ।
घ्यं तोयं च्यं स्मृतं याच्यं शोच्यं पैशाच्यमेव च ॥ २० ॥

छ्यं ष्टेवं(?) ज्यं स्मृतं याज्यं जातं झ्यं झषनाशनम् ।
ट्यं स्फेट्यं ठ्यं स्मृतं शाठ्यं[3] ड्यं जाड्यं ढ्यं धनं वनम् ॥२१॥

---

१ क. ग. जया सिञ्जिनी । २ क. ब्याऽम्बा भ्योऽभयः पुमान् । ३ क. वाक्यं ।

ण्यं न्याय्यं त्यं स्मृतं ह्यऽन्त्यं थ्यं पथ्यं द्यं सुखं चिरम्[1] ।
निन्द्यं ध्यं ह्यऽन्ध्यमित्युक्तं न्यं न्याय्यं नयनं वरम् ॥ २२ ॥
प्यं कुप्यं पात्रमित्युक्तं फ्यं पयो मरणं रजः ।
ब्यं सुखं भ्यं भयं रौद्रं म्यममायं त्वमुत्करम् ॥ २३ ॥
य्यं कृत्यं न्याय्यमाधारं ल्यं प्रोक्तं निलयं बुधैः ।
व्यं वियद्वदनं वस्त्रं श्यं शापे[2] वश्य इत्यपि ॥ २४ ॥
स्यं सस्यं[3] कांस्यमित्युक्तं ह्यं हस्तिवदनं गृहम् ।
क्ष्यं क्षीरं क्षेत्रमुत्क्षारं क्ष्या पृथ्वी जगदीश्वरी ॥ २५ ॥
क्वः कविः काव्यं तातः स्यात् क्वा भूरिति निगद्यते ।
क्वं काव्यं कमलं च स्याद् ग्वो गौर्गरुड उच्यते ॥ २६ ॥
ग्वा धेनुर्ग्वं स्मृतं गुह्यं घ्वो घोषो घ्वाऽरणिः स्मृता ।
घ्वं घुष्टं घर्षणं घासं छ्वः छागः छ्वा छविः स्मृता ॥ २७ ॥
छ्वं स्वच्छमुच्छ्रं[4] गोमूत्रं ज्वो जवो ज्वा च चञ्चला ।
ज्वं जुष्टं झ्वः समुद्रः स्याद् झ्वा वशिष्ठवधूः स्मृता ॥ २८ ॥
झ्वं दुग्धं दधि च प्रोक्तं ट्वोऽत्री रामपिता मनुः ।
ट्वा खट्वा ट्वं स्मृतं पुष्टं ठ्वो वशिष्ठोऽथ[5] विठ्ठलः ॥ २९ ॥
पीठः ठ्वा मधुरा ठ्वं तु पुष्करं चाक्षमुच्यते ।
ड्वो भरद्वाजपुत्रः स्याद् ड्वा दाढा[6] ड्वं महोदरम् ॥ ३० ॥
ढ्वो ढेढो[7] ढ्वाऽशनः रूयग्र्याः(?) ढ्वं पयोदधिश्चोदनम् ।
ण्वो नाथो जमदग्निः स्याद् ण्वा वाण्युज्जयिनी प्रभा ॥ ३१ ॥
ण्वं रूपमणु[8] च प्रोक्तं त्वस्तुरङ्गो महेश्वरः ।
त्वाऽश्वपत्नी च गौरी च त्वं तुल्यं तरणं स्मृतम्[9] ॥ ३२ ॥

---

१ ख. मुखं । २ ख. ग. स्वापे । ३ क. शस्यं काश्यमि० । ४ क. स्वच्छमुखं । ५ क. ०वसिष्ठोऽथ । ६ ख. डाढा । ७ ख. ढेढे । ८ क. निरूपमणु च । ९ क. ग. तथा ।

थ्वोऽर्थोऽक्षरोऽरुणो थ्वा [च] स्त्री थ्वं मैथुनमुच्यते ।
द्वो दावो द्वा पुरी गङ्गा द्वं दूरं[1] वरदं च युत्[2] ॥ ३३ ॥
ध्वो धवोऽग्निर्वधोऽध्वा ध्वा धरा धारा वधूत्तमा[3] ।
ध्वं धन्यं धूननं ध्वस्तं ध्नोऽहिर्बुध्नो धनी स्मृतः ॥ ३४ ॥
ध्ना धन्या मातुली शाला[4] ध्नं धनं साधनं वनम् ।
न्वो नवो न्वा नवा तन्वी न्वं नवं वस्तु गद्यते ॥ ३५ ॥
प्वो वायुः प्वा स्मृता धूलिः प्वं पुण्यं पतनं गिरेः ।
ब्वो ब्रह्मा गीष्पतिर्ब्वोऽम्बा ब्वं वाक्यं मधु विद्विषः ॥३६॥
भ्वो भवो भरतो ब्रह्मा भ्वा गौरी भ्वं निवेशनम् ।
म्वो वृक्षो म्वा धरा म्वं खं ब्रह्म पुस्तकमुत्तमम् ॥ ३७ ॥
य्वो यवो जवनो यक्षो य्वा योषिज्जघनोत्तमा ।
यतनं यमनं य्वं तु रुदनं मर्दनं जगत् ॥ ३८ ॥
ल्वो लवो रामपुत्रस्तु ल्वा लव्या ल्वं तु सूदनम् ।
शल्यं श्वं शरणं यन्त्रं मैथुनं गगनं[5] गतम् ॥ ३९ ॥
श्वं प्रोक्तं शयने याने श्वः प्रातरशनो हयः ।
श्वाऽश्वा तु चन्द्रमःपत्नी स्वः स्वर्गः सुहृदित्यपि ॥ ४० ॥
स्वो निजो भगवान् विष्णुर्भक्तो भासुर इत्यपि ।
स्वा स्वकीया च योषिच्च गौरी शक्तिः परेश्वरी ॥ ४१ ॥
स्वं गृहं धनमायुष्यं पुण्यं पाप्मा गतिः सुखम् ।
ह्वः प्रह्वः शतजिह्वः स्यात् ह्वा जिह्वा तरुणी सरित् ॥ ४२ ॥
ह्वं वायुगमनं क्ष्वेडा क्ष्वः क्षोदो[6] क्ष्वा सरिद्वरा ।
क्ष्वं क्षीवं क्षरणं क्षीरं पालनं तारणं पितुः ॥ ४३ ॥

---

१ क. नूरं । २ क. ग. यत् । ३ क. वधूः क्षमा । ४ ग. माला । ५ क. ग. गमनं । ६ क. क्षोदौ ।

स्नः सारः स्ना प्रमुच्छ्रेष्ठा[1] स्नं स्नानं मधुवारणम् ।
घ्नो घनो नाशको घ्ना द्यौः घ्नं जलं निबिडं पतत् ॥ ४४ ॥

म्नो मानो म्नाऽमरोत्तरा म्नं मनो मरणं मधु ।
क्लः कलः क्ला कला क्लं तु कलं कलमनुत्तमम् ॥ ४५ ॥

स्कः शुष्कः स्कन्धशूरः स्यात् स्का स्कन्दजननी सुरा ।
स्कं शुक्रं शरणं वृत्तं वादित्रं वेदनं[2] सुखम् ॥ ४६ ॥

स्लं शूलमसुखं[3] स्ला तु सरमा स्लस्तु षट्पदः ।
बाणो नरोऽमरो दैत्यो राक्षसो गरुडोऽरुणः ॥ ४७ ॥

श्लः शिलः शलभः शुक्लः श्ला शलाका शिला तथा ।
श्लं शुक्लं चूर्णमाधारं गगनं[4] शूलभृच्छिरः ॥ ४८ ॥

क्ष्लः श्लोकः[5] क्षुद्रवदनो क्ष्ला क्षोण्यऽक्षौहिणी तथा ।
क्ष्लं क्षुद्रं वस्तु मरणं भवनं शरणं वनम् ॥ ४९ ॥

ळं लक्ष्म ळा स्मृता गौरी ळो लोकस्तर्क इत्यपि ।
ख्लः खलः ख्ला सुरा क्षुद्रा योषित् कमललोचना ॥ ५० ॥

ग्लौः शनिर्ग्लो गुडो ग्लाऽम्बा ग्लं गलं गलनं सरित् ।
घ्लोऽश्वो घ्ला जघना घ्लं तु वृक्णं सारथिपातनम् ॥ ५१ ॥

छ्लः छलं छलकृत् छ्लोर्द्धा पुरी छ्लं तु शिवालयम् ।
प्लः प्लवङ्गः प्लवः शूरः प्ला पाटी परमेश्वरी ॥ ५२ ॥

प्लं मांसं प्लवनं मद्यं पूरणं धरणीतलम् ।
फ्लं फलं बाणपूरं च वदनं सकलं वपुः ॥ ५३ ॥

ब्लं बलं ब्ला स्मृता रक्ता वरटी[6] कङ्कुरित्यपि ।
ब्लो बालोऽघासुरः कंसोऽज्ञोऽध्वा मारोऽनलो[7] यमः ॥ ५४ ॥

---

१ ख. ग. प्रमच्छ्रेष्ठा । २ ख. ग. गदनं । ३ ख. शूलं ससुखं । ४ क. गमनं । ५ क. ग. शोकः । ६ ख. बरटी कङ्कुरित्यपि, ग. वराटी कङ्कुरित्यपि । ७ क. मारोऽनिलो ।

ढ्लं माल्यं मधुरं ढ्ला क्ष्मा ढ्लिर्देवेशोऽमरावती ।
ढ्लः कल्पः कमलानाथो गरुडो हंससारथिः ॥ ५५ ॥

क्रः करः शरभो व्याघ्रो नाथः क्रा सुरभिर्मही ।
क्रं खमिन्द्रियमित्युक्तं ख्रो रवौ रासभे खले ॥ ५६ ॥

ख्रा पूतना [1]सूर्पणखा ताडका कैकयी क्षितिः ।
ख्रं खड्गं दुष्टहृदयं मैथुनं मरणं तथा ॥ ५७ ॥

ग्रो [2]गेदो गुद आसारो ग्रा राज्ञी ब्रह्मयोषिता ।
ग्रं गृहं ग्रहचक्रं [3]खमगारं शुक्रमेव च ॥ ५८ ॥

घ्रो घोषो मदनश्चूतो भगोऽज्ञो यामिनीपतिः ।
घ्रा घृणा सरमापुत्री घ्रं गृहं वदनं निजम् ॥ ५९ ॥

ङ्रो नरोऽशरणोऽशूरो ङ्रा मारिणिरिति स्मृता ।
ङ्रं गृहं [4]रुदनं नाशा प्रभा हानिश्च कथ्यते ॥ ६० ॥

च्रश्चरश्चरमः श्लोकश्चूतश्चारण इत्यपि ।
च्रा चञ्चूश्च चमूश्चाट्ट च्रं [5]मैथुनकमप्रजम् ॥ ६१ ॥

छ्रो द्वेषी छुरको खड्गः सरुरङ्गणमार्गगः ।
छ्रा विष्टा शुनकी वेश्या छ्रं छलं गमनं गृहम् ॥ ६२ ॥

ज्रो वृद्धो गगनेऽटोऽग्निर्ब्रह्मोमेशो [6]रमाधिपः ।
जटायुश्च जरायुश्च [7]जमदग्निर्जनीपतिः ॥ ६३ ॥

ज्रा जरा जरठा जारवत्सला षट्पदी घृणिः ।
ज्रं यज्ञोतमजस्त्रं(?) च रजस्वलामुखं रजः ॥ ६४ ॥

झ्रो [8]नदो जरठो दारो झ्रा जरा हानिरीश्वरी ।
झ्रं जुष्टं भ्रमरे घुष्टं पुष्टं [9]सृष्टं गृहं कजम् ॥ ६५ ॥

---

१ ख. सूर्पणखी । २ क. ग. गरो । ३ क. खमाधारं । ४ क. ग. रोदनं । ५ क. मैथुनकमवज्रम् । ६ क. ग. रमापतिः । ७ ख. ग्निर्जुनीपतिः । ८ ख. नादो । ९ क. सुष्टुगृहं कथम्. ।

T5

ञ्रूश्चौरो ञ्रा स्मृता नीतिर्गतिः ञ्रूं भगवन्मुखम् ।
ट्रूः पीठः ट्रा स्मृता पूपा ट्रूं घोटकमुखं सरः ॥ ६६ ॥
ठ्रो मिष्टान्न-फलस्रावः[1] ठ्रा टिट्टा भ्रमरी सुरा ।
ड्रो दण्डो डमरुर्दक्षो दूरगो ड्रूं सुरोदकम् ॥ ६७ ॥
ड्रा टिट्टी मत्स्यगन्धा स्यात् झषपत्नी महोदरी ।
ड्रूं मद्यं मधुरं पुष्पं नर्मदाजलमम्बुजम् ॥ ६८ ॥
ढ्रूः स्याद् धृष्टं द्युम्नं तातो विदुरो नर्मदाझषः ।
ढ्रा गान्धारी सती स्वाहा स्वधाऽऽज्ञा सरयूरपि ॥ ६९ ॥
ढ्रूं फल्गु मरणं भ्रष्टं सुभ्र्वास्यं स्पन्दनाक्षमम् ।
ण्रो नष्टोऽम्बरगो भीरुः कर्णो बीभत्सुरुद्भवः ॥ ७० ॥
ण्रा नर्मदा च गौर्गोदा गङ्गा द्रौपदजाऽम्बुजा[2] ।
ण्रूं नामसयुधं(?) पात्रं वाक्यं नारदभाषितम् ॥ ७१ ॥
त्रस्त्रिनेत्रोऽब्जजः पाता गरुत्मान् मघवानपि ।
त्रा गौरी गरदा पात्री तारणी सरमा तरी ॥ ७२ ॥
त्रं स्मृतं त्रुटितं घुष्टं जुष्टं पुष्टं परं पदम् ।
गान्धारीवदनं कर्णं वचनं द्रौपदीरितम् ॥ ७३ ॥
थ्रस्तीर्थवासकृत्पूतो जारः पुष्टोऽम्बिकात्मजः ।
थ्रा स्थिताऽथ रमा राज्ञी रजनी रजकात्मजा ॥ ७४ ॥
थ्रं तीर्थं सुखमायुक्तं मरणं मध्वरेर्मुखम् ।
द्रो द्रोणो द्रोणसूनुः स्यात् काकः काकसमो नरः ॥ ७५ ॥
भयकृद्धरतो राजा रतिदेवो रमापतिः ।
द्रा दरी सरमा क्षुद्रा द्रोणमूर्तिर्दुरात्मजा ॥ ७६ ॥
द्रं भयं[3] गमनं क्षुद्रं क्षोदनं सरमामुखम् ।
सुतटं सुखदं सामस्मरणं श्रयणं गुरु ॥ ७७ ॥

---

१ ख. मिष्टान्नफलस्रावः । २ क. द्रुपजाऽम्बुजा. । ३ क. भद्रं ।

ध्रो भूध्रो धारकः साक्षी धृष्टद्युम्नो धरात्मजः ।
वृकोदरो गदापाणिर्गरुत्मद् भ्रातृवल्लभः ॥ ७८ ॥
ध्रा धरा कुध्रजा कूलगा खगा पथिगाऽम्बुगा ।
ध्रं ध्रुवं धरणं धारा धरस्थानं च कूबरम् ॥ ७९ ॥
न्रा नारी नर्मदा दुष्टा नरवाग् नरकोद्भवा ।
पृथा पुष्टा परेशानी परमानन्ददायिनी ॥ ८० ॥
न्रो नरो नरकोऽङ्गारो नामदो नार्मदो ह्रदः ।
न्रं गृहं नरकोऽगारं गरुडाङ्गं गरोद्भवम् ॥ ८१ ॥
प्रा प्रकृष्टा महादेवी महालक्ष्मी रजोद्भवा ।
मैथुरा[१] मर्ममाराऽम्बा क्षमा क्षमा क्षामनासिका ॥ ८२ ॥
(?) प्रः प्रकृष्टोऽन्धकारातिर्मुरारातिः कजोद्भवः ।
कामोऽरातिर्ध्रुवोऽगस्त्योऽरुणोऽरुणपितामरः ॥ ८३ ॥
प्रं ब्रह्म गगनं भूरि भ्रमराङ्गं धरान्तरम् ।
गङ्गातीरं पयः पेयं पाथः पारपरं[२] सरम् ॥ ८४ ॥
फ्रः फूत्कारः स्वनः फेनः स्फुरन् स्पष्टोऽम्बरे चरः ।
फ्राऽलीरपत्नी कमला खरी क्षारनदी सुरा ॥ ८५ ॥
फ्रं स्फुरद्वसनं जुष्टं यन्त्रं स्फेटितमुद्धृतम् ।
प्राकृतं गगनं ध्वस्तं धृतं धरणमुच्यते ॥ ८६ ॥
ब्रो बृहस्पतिराचार्यो बटुर्बुद्धोऽम्बरावृतः ।
बौष्कलो[२] बहुदोऽम्बाजो बहुव्रीहिश्च बुद्बुदः ॥ ८७ ॥
बालो बाणोऽबलो बद्धोऽम्बष्ठोऽब्दो बधिरः स्मृतः ।
ब्रा बाला बधिराम्बष्ठी बटी बद्धाऽम्बरेश्वरी ॥ ८८ ॥
ब्रं ब्रह्म बलमुच्छ्रेष्ठं बधिराङ्गं तथाऽम्बरम् ।
बहुलं बाहुसारं च बधिरास्यं बटोर्मुखम् ॥ ८९ ॥

---

१ क. मधुरा. । २ ख. ग. परपरः सरः । ख. वाकलो ।

भ्रो ब्रह्मा प्रकरो[1] भारो भ्रमरो धूसरोऽधरः ।
भासुरो भ्रामको भ्रष्टो भीमसेनोऽभयः स्मृतः ॥ ९० ॥
भ्रं भासुरं तथाऽभ्रं तु भ्रामकं भ्रमणं[2] भयम् ।
भ्रा भ्रष्टा ब्राह्मणी भा च हिडम्बा धरणी तथा ॥ ९१ ॥
म्रोऽमरो मृत्युरमर्त्यो मैथुनी माधवो बलः ।
म्राऽमरी मानवी मारमानिनी यामिनी शुनी ॥ ९२ ॥
म्रं मैथुनं मृताङ्गं च मरणं मस्तकं मधु ।
यॄो यादवोऽर्जुनो जारो यॄा जरा जरठाऽजरा ॥ ९३ ॥
यॄं जुष्टं भोजनं भ्राजत् जायमानं जरोद्भवम्[3] ।
यॄि: कामिनी प्रिया पुष्टा परमा पारगाऽम्बुधेः ॥ ९४ ॥
ऌो लण्डो लालितोऽल्कोऽङ्को ऌा लाजा लालिताम्बुल(?) ।
ललिता प्लावितं ऌं खं लालितं ललनामुखम् ॥ ९५ ॥
व्रोऽवरो ह्यवरो वास्त्रो वाडवो वासरोऽम्बुधिः ।
व्रा श्रेष्ठा गिरिजा लक्ष्मी रत्नाकरगता तथा ॥ ९६ ॥
व्रं लुलायमुखं भीमं भासुरं श्रेष्ठमुच्यते ।
श्रः शरोऽसारदोऽसारः शरण्यः सारथिः शिवः ॥ ९७ ॥
श्रा गौरी तु रमा रामा रत्नाकरकृतालया ।
श्रं शरण्यं सुनृणं[4] च तारुण्यं तादृशं शिवम् ॥ ९८ ॥
षॄः सुरेशोऽदितीशोऽर्कोऽरुणोऽर्णव उरुक्रमः ।
ष्रा गौरी सारवत्पत्नी पारणा परमामरी ॥ ९९ ॥
षॄं कष्टं करुणं काष्ठं कोमलेतरमुज्ज्वलम् ।
स्रः शरः सरमाभर्त्ता भक्तोऽभासुर-भासुरः(रौ) ॥ १०० ॥
स्रा शिवाऽभयपत्री च भक्ता ब्रह्मसुता तथा ।
स्रं श्रेष्ठं सारदं वस्तु वदनं वरुणासनम् ॥ १०१ ॥

---

१ क. ग. प्रकारो । २ क. भरणं । ३ क. नरोद्भवं । ४ क. सुमुणं, ग. सुरूणं ।

ह्रो हरो हरिणो हारो हरिर्हाहा हुहुर्हयः ।
हर्षो हंसोऽहरुद्धर्षो हासो हस्ती च नाहुषः ॥ १०२ ॥
ह्रा गौरी हरिणी हंसी हर्षयुक्ता च हस्तिनी ।
देवयानी च शर्मिष्ठा ह्रूं तु चौर्यं चरो गरः ॥ १०३ ॥
क्ष्रूः क्षरः क्षरणः क्षारोऽक्षोडोऽक्षराक्षरः(?) ।
क्ष्रा लक्ष्मीः क्ष्रूं[1] क्षयि क्षारं क्षोदनं क्षेरणं[2] खरम् ॥ १०४ ॥
स्तः सुतः स्तिः सुरः शङ्खः सुता सारसयोषिता ।
स्ता प्रशस्ता शदा[3] पक्षिपत्नी पाटलगौः स्मृता ॥ १०५ ॥
स्तुः सारस्तूण आचार्यो लक्षं[4] स्तूस्तोरणः स्मृतः ।
स्तं शस्तं शरणं राजगृहं गगनमुद्धतम् ॥ १०६ ॥
ष्ट्रो भ्रष्टः शकटो व्रात्यो विप्रो वरुण[5] आसवः ।
ष्ट्रुः सुष्ठु शरणं भ्रष्टं भासुरं भक्तमेव च ॥ १०७ ॥
ष्टिर्यष्टिर्विष्टिरावृष्टिरावृत्तिर्वरुणाङ्गना ।
ष्टी यष्टी सरमा भ्रष्टा भ्रामका भ्रमिरासुरी[6] ॥ १०८ ॥
ष्टा घुष्टा गृहिणी गाली सूर्यपत्नी जलालया ।
ष्टं श्रेष्ठं शरणं साधु गदनं वदनं मधु ॥ १०९ ॥
ष्टः षँष्ठोऽनुस्वरोऽङ्गारोऽघासुरोऽसुरसत्तमः[7] ।
गोविन्दो गरुडो गण्डो घासोऽगारोऽगरोऽमरः ॥ ११० ॥
इत्येषा रचिता मालाऽक्षरी **सौभरिणा** शुभा ।
यः पठेत् शृणुयाच्चेमां स शब्दार्णवपारगः ॥ १११ ॥

॥ इति श्रीसकलविद्यानिधिना श्रीसौभरिणा मुनीश्वरेण विरचिता द्व्यक्षरनाममाला समाप्ता ॥ [४]

*

---

१ ख. क्षयं । २ क. क्षारणं । ३ क. सदा । ४ क. ग. लक्ष्य । ५ ख. वरुण वासवः । ६ क. भ्रामिरी सुरी । ७ क. षण्ढो मुखरोऽङ्गारो, ग. षष्ठोऽनुस्वरोऽङ्गारो ।

हरितालराजामात्यमाधवकृता

[५] एकाक्षरशब्दमाला

वेद-विष्णु-महेशान-कमलेष्वम्बिकेज्ययोः ।
अन्तःपुरी-भूषणे च चरणे कारणे रणे ॥ १ ॥
अकारः कथितो धीरैरङ्किते गौरवेऽपि च ।
असवर्णेऽभिव्याप्तौ च परितापे विदाहिनि ॥ २ ॥
ईषदर्थे विस्मये च सन्तोषा-ऽमर्षयोरपि ।
सुखेन आङ् तथा सीम्न(म्नि) चिरविस्मृतिसंस्मृतौ ॥ ३ ॥
अल्पवस्तुनि च प्रोक्तो सलिला-ऽऽक्षेपयोरपि ।
इकारः कुसुमास्त्रे च हारे चन्द्रमसः करे ॥ ४ ॥
तथा करेणुकट्यन्ते महीभृत्कुहरेऽपि च ।
भुजङ्गफणङ्के च मृगे धेनौ च रूप्यके ॥ ५ ॥
उकारः सायके शर्वे वरे नीरजकेसरे ।
शक्रचापे हरौ पाणौ कमलारचनास्वपि ॥ ६ ॥
क्षोणीभृत्कुहरे पद्मदलेषु गदितो बुधैः ।
ऊकारः क्षत्रिये शम्भौ हरमौलौ हरौ शनौ ॥ ७ ॥
तपो-द्रुमाग्र-चन्द्रार्ध-गौरभूषु विलोचने ।
ऊकारे रजनीनाथे पुरुषे राजपुत्रके ॥ ८ ॥
गले मङ्गलकुम्भे च देवे फणिनि तक्षके ।
उपमाने प्राङ्गणे च क्वचिदर्थे प्रवर्द्धके ॥ ९ ॥
ऋकारस्तु रिपौ बुद्धिविशेषे कुञ्जरेऽपि च ।
शवे देवतटिन्यां च सुरायां देवमातरि ॥ १० ॥
विधुरे महति प्रोक्तो नामशासनकोविदैः ।
ॠकारश्चिकुरे सर्पमणौ विगतसम्पदि ॥ ११ ॥
भूते भुजङ्ग–स्यां (?) च तथा दनुजमातरि ।
भू(त)र्पणे सलिले पद्मे तुहिने तरले घने ॥ १२ ॥

ऋकारस्तु तथैवोक्तः प्राज्ञैकाक्षरकोविदैः ।
लृकारो लिप्तमात्रे(गात्रे) च त्रिदिवेशे वने – ते (?) ॥ १३ ॥
किटिदन्ते हस्तिदन्ते कुलीर-कपिदन्तयोः ।
सुपर्णमातरि प्रोक्तो रजस्यपि मनीषिभिः ॥ १४ ॥
ॡकारस्तु गिरौ देहे(वे) कृकलासेऽङ्ग-बाणयोः ।
मकरीवदनागारे जनन्यां नागमातरि ॥ १५ ॥
लीलागमननेत्रेषु रोचनाङ्गेषु च स्मृतौ ।
एकारः कथ्यते विष्टौ रजनीशाविधानयोः ॥ १६ ॥
हर्म्योदरे दीनमृगे गगने मणिकुट्टिमे ।
तेजस्त्रैकालिकाख्यायां संख्यायामपि दृश्यते ॥ १७ ॥
ऐकारः सङ्करे हस्ते दन्तागेष्विन्दु(द्र)वारणे ।
– –लावर्त्तदेशेषु त्वचि स्याच्छिखरे गिरौ ॥ १८ ॥
ओकारो वर्णशीतांशुपङ्कदायाद्य(ब्ज)केषु च (?) ।
त्रिदिवेशे पयोवाहजीवस्वसदनेऽपि च ॥ १९ ॥
योनौ सरोजतोयार्थे कुड्ये च कथितो बुधैः ।
औकारः पर्वते पुत्रे प्रश्ने चौषधिमानयोः ॥ २० ॥
विशुद्धकायेऽनन्ते च कलायां रजनीपतौ ।
तथा सिद्धविमानार्थे कथ्यते कृतबुद्धिभिः ॥ २१ ॥
कार्ये स्याद् वज्रकवचे मुनौ कम्पयुते जये ।
सप्तस्वरान्तमाने च सङ्गीतज्ञैरुदाहृतः ॥ २२ ॥
अं शब्दोऽञ्जलिपर्याये परस्मिन्नपि तेजसि ।
अः शब्दो गिरिजानाथे सिद्धमन्त्रे रमापतौ ॥ २३ ॥
दिनेशस्य निशेशस्य ग्रहोपद्रवसम्भवे ।
शिखायां चन्द्रबिम्बे च चरणा – धमस्तके ॥ २४ ॥

॥ इति हरितालमाधवस्य कृतौ एकाक्षरमालायां स्वराक्षरकाण्डः प्रथमः ॥

*

॥ अथ व्यञ्जनकाण्डः ॥

कः स्याद्रुते महे बुध्ने मारुते शमने वने ।
सितवर्णे मयूरे च हठे चाट्वनि वारिदे ॥ २५ ॥
वशे च हरिशबरे च प्रकाशे पुंसि कथ्यते ।
स्त्रीलिङ्गे च सुराणां तु कं तु स्याच्च नपुंसके ॥ २६ ॥
सलिले जलजे चैव ब्रह्मण्यपि च मस्तके ।
शर्वकामेऽपि किंशब्दस्त्रिषु लिङ्गेषु संस्मृतः ॥ २७ ॥
अथाऽध्याये निरुक्तेऽपि कु च प्रश्नार्थयोरपि ।
कुशब्दस्तूपसर्गे स्यादुर्व्यां विसहितेऽपि च ॥ २८ ॥
चक्रे च कैतवे हारे ध्वांक्षे कोपे शिखिन्यपि ।
कं स्यात् पक्षे विशेषे च गुप्तकार्ये युधिष्ठिरे ॥ २९ ॥
त्रिलिङ्गे का-कुशब्दस्तु ध्वनिवैरूप्यसम्भवे ।
गायकानां कण्ठदोषे कै कं क्रें का शिखिस्वने ॥ ३० ॥
क – – – नभेदे च शास्त्रभेदे च अन्नदे ।
क-को-कशब्दः कुमतः पुंनपुं – – – र्दहाः (?) ॥ ३१ ॥
– – र्थिने च तादर्थ्ये कप्रत्ययमुदाहृतम् ।
खः पुल्लिङ्गे कृशे – ने स्वर्ग-शून्य-दरा-ऽग्निषु ॥ ३२ ॥
कृपणे निश्चये शान्ते रथे विहगनायके ।
कर्मेन्द्रिये सुखे क्षेत्रे क्ली[बलिङ्गे] विहायसि ॥ ३३ ॥
दन्तधावन-संवेद-पुण्यादिफलदेष्वपि ।
गशब्दः पुंसि गान्धारे गन्धर्वे गणनायके ॥ ३४ ॥
उपमार्थे महीपुत्रे छन्दस्सु गुरुवाचके ।
स्त्रियां तु सुखशै – – गो गत्योरपि गा स्मृता ॥ ३५ ॥
नपुंसके च गलिते नागे च परिकीर्त्तितः ।
गौः स्यात् पुंसि निशानाथे क्रतुभेदे प्रभाकरे ॥ ३६ ॥

वृषभे मुनिभेदे च स्त्रियां तु धरणीविभौ ।
आशायां च सरस्वत्यां सुरभावपि कथ्यते ॥ ३७ ॥

स्त्रीपुंसयोस्तु **गो**शब्द इष्टि-दीधिति-रागिषु ।
व्योम्नि स्वर्गे खगे दण्डे **गङ्गा** तु सुरवाहिनी ॥ ३८ ॥

घशब्दः पुंसि वै नागे पराक्रम-निदाघयोः ।
घण्टा-हननयोश्चापि वैशाखे च निगद्यते ॥ ३९ ॥

घा चाऽऽर्त्तिः किङ्किणी च स्याद् घं नादा-ऽमृतयोर्भवेत् ।
ङशब्दो निनदे पुंसि सुरभौ परिकीर्त्यते ॥ ४० ॥

ङशब्दः शरपौरार्थे त्रिषु लिङ्गेषु वर्त्तते ।
ज(ङ)कारः पुंसि शब्दज्ञे भैरवे देशयोजने ॥ ४१ ॥

अनुबन्धानु – – – – पुव्यसनशायिषु ।
पुंसि केत्वञ्जने स्याद् वा त्रिलिङ्गे च भयङ्करे ॥ ४२ ॥

चः पुंल्लिङ्गे निशानाथे तुरुष्के तस्करे खरे ।
चा शोभायां स्त्रियामुक्ता रुधिरे च नपुंसके ॥ ४३ ॥

चशब्दस्त्रिषु लिङ्गेषु – – – र्थी व्ययेषु सः (?) ।
समुच्चया-ऽपचययोः पक्षान्तरनिरूपणे ॥ ४४ ॥

समासके समाहारे मिथोयोगेऽप्युदाहृतः ।
चञ्चुः स्त्रियां पक्षिमुखे **चिञ्चा** स्यात् तिन्तिणीफले ॥ ४५ ॥

चे नदीतोयमित्यर्थे **चञ्चु** प्रत्ययमिष्यते ।
छः पुंसि छ – – – – छागे शक्तिधने छगे ॥ ४६ ॥

श्रुते प्रलापे मन्त्रस्य विभागे ह्यक्षरस्य च ।
आदानेऽपि चरित्रे च वर्त्तते पुं-नपुंसके ॥ ४७ ॥

सर्जो-निर्मलयोरुक्तः छकारो वाच्यलिङ्गकः ।
जः पुमान् विजले मुक्ताविस्तारे मत्सरीजने ॥ ४८ ॥

जं तूक्तो वरशब्दे जा स्त्रियां देहविदा(वा)हिनी ।
योनौ समुद्रवेलायां पुंनपुंसकमम्बुदे ॥ ४९ ॥

कटीविभूषणे पद्मयां जः स्याज्जनन-जैनयोः ।
झः पुंल्लिङ्गे जवे व्योम्नि विचारे च प्रकीर्त्यते ॥ ५० ॥

झा स्त्रियां तु सरस्वत्यां झा झिः स्यात्तरुसम्भवे ।
पुंल्लिङ्गे तु ञकारः स्याद् ससी - - - सम्भवे ॥ ५१ ॥

ञं ञूनि(रि)ति प्रतापे च हंसके भ्रमरे मदे ।
उपाये ञ निधाने [च] ञं तु स्याद् द्युति-पद्मयोः ॥ ५२ ॥

भयङ्कराख्यशब्दे स्यात् त्रिषु लिङ्गेषु कीर्त्तितः ।
ञकारोऽपि तथाऽनष्टे ञंञा तीव्रसमीरणे ॥ ५३ ॥

टकारः पुंसि विषये विरुद्धे गर्दभस्वने ।
त्रिलिङ्गे - हरिगः (?) स्यादुत्ताने मूढरूपके ॥ ५४ ॥

टशब्दः सोऽध्वगे सूनौ करटे धूम-तापयोः ।
आवर्त्ते भानुरुद्धा (?) च कराटे टुः प्रकीर्त्यतेः ॥ ५५ ॥

टा स्त्रियामपि मृज्यायां व्याहृतौ च निगद्यते ।
ठशब्दः कथ्यते पुंसि बृहद्ध्वान-महीपयोः ॥ ५६ ॥

नपुंसके साहसे स्यात् सम्भवे चन्द्रमण्डले ।
त्रिलिङ्ग्यां तु शठे शून्ये मनोजे कठिनेऽपि च ॥ ५७ ॥

ठुकारः कथ्यते पुंसि विषये शङ्करेऽधरे ।
हस्त्यश्वानां निनादे च क्षये क्षौद्ररसे धने ॥ ५८ ॥

स्त्रियां तु वाजिशिक्षायां पीडायामपि ठा स्मृता ।
भवेन्नपुंसके दुर्गपथे समरुगे तथा ॥ ५९ ॥

डशब्दः पुंसि डिण्डीरे हस्ते चापि भगन्दरे ।
पिशाचे पथिके काले रागे च परिकीर्त्यते ॥ ६० ॥

डुशब्दस्तु त्रिलिङ्गे स्याद् गूढे सौम्या-ऽपसव्ययोः ।
णशब्दः कण्ठके जारे भैरवे च भगन्दरे ॥ ६१ ॥

णा स्त्री रजन्यां जायायां वेदनायामपि स्मृता ।
णं संशोध्यजले ज्ञाने गमने परिकीर्त्यते ॥ ६२ ॥

णशब्दस्त्रिषु लिङ्गेषु भवेन्निश्चलवस्तुषु ।
तकारः पुंसि संयोगे निश्चये विस्तरे समे ॥ ६३ ॥

तु [स्याद् ?] वादविधौ क्रोधे ता कृपायां स्त्रियां मता ।
पश्चादर्थे विवक्षायां तत् शब्दस्याव्ययं भवेत् ॥ ६४ ॥

तद्वत् समुच्चये हेतौ निश्चये चावधारणे ।
ततः शब्दोऽनन्तरार्थे तातस्तु जनके पुमान् ॥ ६५ ॥

तन्तुः पुंसि गणे स्तोमे स्त्रियां ततिरुदाहृतः ।
नपुंसके तन्तुवाद्ये वीणादौ परिकीर्त्यते ॥ ६६ ॥

ततं चैव त्रिलिङ्गे स्याद् विस्तृतार्थे प्रदृश्यते ।
थः पुमान् सिंह-कल्लोल-विरामेषु महीधरे ॥ ६७ ॥

स्यादास्फालनशब्देषु जाले धातौ स्त्रियां च था ।
थं नपुंसकलिङ्गे तु भवेद् भयनिवारणे ॥ ६८ ॥

त्रिलिङ्ग्यां तु थकारोऽसौ सिता-ऽसित-पृथुष्वपि ।
पुमान् धातरि दः शब्दो दा स्त्रियां क्षोणि-दानयोः ॥ ६९ ॥

दं नपुंसकलिङ्गे तु भवेत् पुत्र-कलत्रयोः ।
दाने सम्बोधने प्रान्ते वैराग्ये चावलोकने ॥ ७० ॥

त्रिलिङ्ग्यां मुषिते मूले गृहीते द्रावके शुचौ ।
पुंनपुंसकयोर्बाहौ दोः स्यात् स(ष)ण्ढे च दोः स्त्रियाम् ॥ ७१ ॥

कृच्छ्रे खे निन्दिते दुःखे चोपसर्गे च दुर्मतः ।
धः पुमान् सन्निभे स्याद् धं मृदुरेणु-कशेरयोः ॥ ७२ ॥

धकारः पुंसि कथितः सानौ मानविशेषके ।
धने धान्ये स्त्रियां **धा** स्याद् भये धूपे च **धः** पुमान् ॥ ७३ ॥

नकारः पुंसि हेरम्बे ना भवेत् पुरुषे तथा ।
नकारस्तु स्त्रियां नादो संवाह्यज्ञान — — — ॥ ७४ ॥

नशब्दस्त्रिषु लिङ्गेषु दन्ते चाभिन्न-सूक्ष्मयोः ।
प्रस्तुते चापरिश्लेषे शून्ये रिक्तेऽपि च स्मृतः ॥ ७५ ॥

ना स्त्रियां संस्तुतौ नावि **नौ** स्यादेवं निरूप्यते ।
नुन्नशब्दस्त्रिलिङ्गेषु प्रेरिते कथ्यते बुधैः ॥ ७६ ॥

अव्ययः प्रतिषेधार्थे **न**कारः स्थिरनिश्चये ।
ना तथा प्रतिषे[धे] स्यादुपसर्गे तु **निः** स्मृतः ॥ ७७ ॥

निश्चये च निषधार्थे **नूनं** स्यात्तर्कनिश्चये ।
नानाप्रकारे भेदे स्याद् भवेन्नु त्ववधारणे ॥ ७८ ॥

पुंल्लिङ्गे चोपकारे स्याद् वपने पर्वते क्षणे ।
पकारस्तु भवेल्लग्ने पत्रे शास्त्रा-ऽर्चयोरपि ॥ ७९ ॥

पा स्त्रियां सङ्गते वारिधार-पान-सुधास्वपि ।
नपुंसके **पं** कनके विपन्ने वाच्यलिङ्गवत् ॥ ८० ॥

आप्ये चापे च दैवे स्यात् स्त्रियां **पूर्नगरी** स्मृता ।
प्रपशब्दस्तपुरार्थे(?) बुधैः पुंसि निगद्यते ॥ ८१ ॥

पम्पा सरोविशेषे स्त्री **पापं** पुण्येतरेऽपि च ।
तद्वति त्रिषु लिङ्गेषु **पा**ऽप्युक्ता शब्दशासने ॥ ८२ ॥

झञ्झावर्त्ते **फ**कारः स्यात् प्रासादे प्राङ्गणे रणे ।
फकारो गोश्च पूत्कारे पुं स्यादथ च **फः** स्त्रियाम् ॥ ८३ ॥

दिक्षु प्रोक्ते कला-केश-कुटी-धनुःषु कथ्यते ।
विशेष्यनिघ्नः **फ**शब्दः परोक्षेऽपि हिते तथा ॥ ८४ ॥

ब: पुमान् पुरुषे कुम्भे विकल्पे गगने गुरौ ।
कलहे खगभेदे च भेदे चाल्पे च पर्वणि ॥ ८५ ॥
विभूत्तिकार (?) बिन्दौ च हलाकृष्टविसर्जने ।
बाकारस्तु स्त्रियां वल्ली-काहली-शृङ्खलास्वपि ॥ ८६ ॥
नपुंसके बले पुं स्यादमले वाच्यलिङ्गवत् ।
बि: पुमानण्डजे व्योम्नि बिम्बत्वेऽथ नपुंसके ॥ ८७ ॥
पलिभेदे पुष्पभेदे मण्डले पुंनपुंसकम् ।
भकार: पुंसि जलभे(दे) छादे शम्भौ शिलीमुखे ॥ ८८ ॥
सुधी: स्त्रियां च भा दीप्तौ स्याद् दाराणामलङ्कृते ।
नपुंसके भं नक्षत्रे गगने मन्त्र-चक्रयो: ॥ ८९ ॥
भी: स्त्रियां साध्वसे भाश्च रश्मौ भूर्भुवि बोध्यते ।
भो भो सम्बोधने दृष्टो माधवे च मनीषिणि ॥ ९० ॥
पुमान् भकार: श्रीकण्ठे चन्द्रे वह्नौ विभावसौ ।
सत्यवादे प्रकोष्ठे च तन्वक्षे संयुते तथा ॥ ९१ ॥
कपिले पिङ्गले वर्णे बिम्बके भु: प्रकीर्त्यते ।
म स्त्रियां मञ्जुकायां च लक्ष्म्यां माने च मातरि ॥ ९२ ॥
मदिरा-मदयो: स्तेन-चेलयोरपि दृश्यते ।
नपुंसके जने पुं स्यादव्ययं मा निवारणे ॥ ९३ ॥
यकार: पुंसि पवने यमे धातरि यातरि ।
त्यागे भावे चये लिप्स्ये विनये कल्पपादपे ॥ ९४ ॥
या स्त्रियां यान-मञ्जर्यो: शोभा-लक्ष्म्योश्च निर्मिता ।
नपुंसके यकारस्तु यशो-रूपकयोर्भवेत् ॥ ९५ ॥
यदु पूर्वभवे – – चाश्वमेधतुरङ्गमे ।
यायी गमनशीले च प्रोक्तो रूढे च मन्त्रिणि ॥ ९६ ॥

रः स्यात् पुमान् शिवे वह्नौ वज्रे कामे रवौ गुरौ ।
अनाथे कपिले पिण्डे वीरे पाके तरीश्वरे ॥ ९७ ॥

नपुंसके रशब्दस्तु धान्य-रोमाञ्च-कुक्षिषु ।
रशब्दस्तु नये बुद्धे भये चैव हि रा स्त्रियाम् ॥ ९८ ॥

आशायां च धने व्योम्नि शालायां च गतौ तथा ।
उत्तमाङ्गे च वदने रुधिरे चापि कथ्यते ॥ ९९ ॥

विशेष्यनिघ्नो रः शब्दो वीरशक्त्यादितीक्ष्णयोः ।
नीचसम्बोधने रे स्यादव्ययं परिकीर्त्तितम् ॥ १०० ॥

मुनिभेदे रुरुः पुंसि मृगभेदे च कथ्यते ।
लः पुंसि रस्त्रि लि स्त्रि स्याल्लं ला लेऽथ नपुंसके (?)॥१०१॥

लकारो लवने लूने वाच्यलिङ्गो भवेदसौ ।
मुखनिस्सृतनिष्ठ्यूते लाला लीला तु विभ्रमे ॥ १०२ ॥

लाल उत्कृष्ट-चलयोर्वाच्यलिङ्गो निगद्यते ।
वः पुमान् स्वान्तगे वाते मरणे संयमेऽधरे ॥ १०३ ॥

प्रबोधे मदने चैव विहगे गगनेऽपि विः ।
शिक्षाभृद्-गन्ध-गतिषु वा स्त्री वं तु नपुंसके ॥ १०४ ॥

वशब्दो नयने वाहे अव्ययं स्यात् समुच्चये ।
उपमायां विकल्पे च निश्चये च निगद्यते ॥ १०५ ॥

उपसर्गे च विश्लेषे पृथगर्थे विकारके ।
विलये च विशेषे च विहतौ वि भवेत् तथा ॥ १०६ ॥

शकारः पुंसि गिरिशे शिष्ये स्वस्मिन् तनूकृते ।
वल्मीके कच्छपे चैव शिकारस्तु सदाशिवे ॥ १०७ ॥

शा स्त्रियां वेदपूजायां शान्ते शोभा-वरेण्ययोः ।
शक्तौ भक्त्यां रमायां च शकारः शयना-ऽऽशिषोः ॥ १०८ ॥

विततावपि शूकारो हिंसायां च निगद्यते ।
षकारः पुंसि त्रिदिवे परोक्षे च भवेत्तथा ॥ १०९ ॥

षोऽस्त्रियां मधुरायां च षकारोऽथ नपुंसके ।
अवसाने गर्भमोहे सुषेणे च निरूप्यते ॥ ११० ॥

नित्राणे निवहे चैव रवे चैत्यादिषु स्मृतः ।
विशेष्यनिघ्नः षशब्दो श्रेष्ठार्थे समुदाहृतः ॥ १११ ॥

सकारः पुंसि साकारे गौरीपुत्रे प्रभञ्जने ।
धर्मे हिते च साकारो देहकान्त्यां स्त्रियां मतः ॥ ११२ ॥

सुस्तदागर्भमोक्षे च सन्धाने विनिवारणे ।
ज्ञाने रथपथे चैव त्रिलिङ्ग इति संस्मृतः ॥ ११३ ॥

श्रेष्ठे विकल्पे सं स्याद्धि सद्वृत्ते उपसर्जने ।
सीसं नपुंसकं प्रोक्तं धातुभेदे मनीषिभिः ॥ ११४ ॥

हकारः पुंसि जनने हरिण्यां हरि-सिंहयोः ।
ईश्वरे सावशेषे च रेणु-रोचन-वाजिषु ॥ ११५ ॥

हा स्त्रियां त्यजने गत्यां वीणायां च निगद्यते ।
नपुंसके हकारस्तु क्षणिते मणिरोचिषि ॥ ११६ ॥

धारणौ हीरब्रह्मण्ये शास्त्रे चाऽऽमन्त्रणेऽपि च ।
सुखे विशेषणे चैव त्रिलिङ्ग्यामपि कथ्यते ॥ ११७ ॥

उपमा-हास्ययोश्चैव हाऽव्यये कुष्ट-शोकयोः ।
आर्त्ति-सर्जनयोरुक्ता हे च सम्बोधने भवेत् ॥ ११८ ॥

हिर्हिते च प्रसिद्धे च ह अङ्गीकरणेषु च ।
हाहा हूहूश्च गन्धर्वे हाहो सम्बोधनेऽव्ययम् ॥ ११९ ॥

हाहा दैत्याद्भुते भेदे कथ्यते नामशासनात् ।
क्षकारः पुंसि दुःस्वप्ने क्षेत्र-राक्षसयोस्तथा ॥ १२० ॥

क्षेमे तु विरहे रोधे विशेषे च निगद्यते ।
क्षा स्त्री क्षमायां निन्दायां क्षं स्याद् दृश्ये नपुंसके ॥ १२१ ॥
क्षेत्रे निर्भर्त्सने चैव क्षोऽव्ययं मञ्जुवाचकः ।

इति हरितालराजामात्यस्य माधवस्य कृतौ व्यञ्जनकाण्डो द्वितीयः ॥

खशब्दोऽव्ययरूपः स्यात् क्षुरलि(?) प्रश्नवाचके ॥ १२२ ॥
स्या(ख्या)तौ स्त्रियां तु स्वा(ख्या)शब्दो ग्लौः स्यात् पुंसि कलानिधौ ।
ज्ञशब्दः सौम्यविदुषो ज्ञा स्त्री स्यादवबोधने ॥ १२३ ॥
ज्याशब्दः कार्मुकगुणे स्त्रीलिङ्गः कथितो बुधैः ।
त्राकारः कथितस्त्राणे स्त्रियां द्वाद्वारि कथ्यते ॥ १२४ ॥
द्रुशब्दः कथितो धीरैः पुंल्लिङ्गो वृक्षवाचके ।
[सं]ख्याभेदे त्रिशब्दश्च द्विशब्दः परिकीर्त्यते ॥ १२५ ॥
द्यौः स्त्रियामम्बरे स्वर्गे धन-कान्त्योर्निगद्यते ।
उपसर्गे प्रकारस्तु प्रकृष्टार्थस्य वाचकः ॥ १२६ ॥
बिल्ववृक्षे विषे लक्ष्म्यां श्रीशब्दः कथ्यते स्त्रियाम् ।
स्वशब्दः स्वात्मनि ज्ञातौ धनेऽपि च नपुंसके ॥ १२७ ॥
स्वकीये तु त्रिलिङ्गः स्यादव्ययं स्वस्त्रिविष्टपे ।
उषायां जन्तुभेदे च स्त्रीशब्दः कथ्यते स्त्रियाम् ॥ १२८ ॥
शृशब्दः शैलकटके पुंनपुंसकयोर्भवेत् ।
ह्रीः स्त्रियां कथ्यते व्रीडा ह्योऽव्ययं दिवसे गते ॥ १२९ ॥
क्ष्माशब्दः कथ्यते प्राज्ञे स्त्रीलिङ्गे भूमिवाचके ।
अनुसम्बोधने धीरे जिते क्षश्च निगद्यते ॥ १३० ॥

॥ इति माधवकृतौ एकाक्षरशब्दमालायां संयुक्ताक्षरकाण्डस्तृतीयः ॥ [५]

---

[६] इरुगपदण्डाधिनाथरचितो नानार्थरत्नमालागत एकाक्षरकाण्डः

रूपभेदात् साहचर्यात् कण्ठोक्त्या वा विभावयेत् ।
लिङ्गा[1]न्यथा[2]दि त्वन्तं[3] वा पदं पूर्वेण नान्वयि ॥ १ ॥
त्रिष्विति त्रिषु लिङ्गेषु ज्ञेयं द्वन्द्वे द्वयोरिति ।
लिङ्गान्तरनिषेधोऽत्र शेषलिङ्गविधायकः ॥ २ ॥
अकारो ब्रह्म-विष्ण्वीश-कमठेष्वङ्कणे रणे ।
गौरवेऽन्तःपुरे हेतौ भूषणेऽङ्गावुमेज्ययोः ॥ ३ ॥
आकारस्तु घटे भावे परितापे पितामहे ।
इकारः फणरत्नार्चि[4]ष्यग्रतोऽर्थ-गुहार्थयोः ॥ ४ ॥
हारे करेणुकुक्ष्यन्ते निशाकरकरे स्मरे ।
ईकारोऽब्जदले लक्ष्म्यां वाण्यां कमलकेसरे ॥ ५ ॥
रचनायां शक्रचापे बाणे फणिनि कन्दरे ।
उकारः क्षत्रिये नेत्रे हरमौलौ हरे हरौ ॥ ६ ॥
ऊकारः पुरुषे चन्द्रे राजपुत्रे गले सुरे ।
प्राङ्गणोपमयोः पूर्णकुम्भे वणिजि रक्षके ॥ ७ ॥
ऋकारः कुञ्जरे शैले धीभेदे देवमातरि ।
भावे देवे रिपौ नद्यां सुरायां विवरे दिवि ॥ ८ ॥
ॠकारश्चिकुरे स[5]र्पदष्ट्यां विगतसम्पदि ।
हिम-पद्म-दिति-स्वर्ग-धन-भूषा-भुजा-ऽम्बुषु ॥ ९ ॥
ऌकारो दन्तिनां दन्ते कुलीर-कपिदन्तयोः ।
स्वर्गा-ऽदित्योर्लिप्तगात्रे गतनप्तरि रक्षसि ॥ १० ॥

---

१ लिङ्गानि विभावयेद् इत्यन्वयः । २ अथादि—अथ आदौ यस्मिन् तद् अथादि । ३ त्वन्तम्—तु अन्ते यस्मिन् तत् त्वन्तम् । ४ घ. ॰र्चिष्ष्वग्र॰ । ५ घ. सर्पे दष्ट्यां ।

लृकारः कृकलासेऽद्रावङ्केऽक्षिण मकरे सुरे ।
लीलागतौ लोचनास्थि नागमातरि मातरि ॥ ११ ॥

एकारस्तेजसि जले रात्रौ हर्म्योदरे हरौ ।
व्योम्न्येकादशसङ्ख्यायां दिनादौ मणिकुट्टिमे ॥ १२ ॥

ऐकारो दिग्मुखे हस्ते हरेऽद्रिशिखरे त्वचि ।
ओकारः पद्म-कुल्या-ऽम्बु-श्रीद-मेघेन्दु-योनिषु ॥ १३ ॥

शङ्के जवे विरञ्चौ स्यादौकारस्त्वम्बिकासुते ।
विशुद्धाङ्गेन्दुकलयोरनन्ते सिद्धपुष्पके ॥ १४ ॥

अंशब्दश्चक्रवाकेऽतिदीर्घेऽञ्जलि-नियोगयोः ।
सप्तस्वरान्तमाने च परज्योतिषि च स्मृतः ॥ १५ ॥

अः शिखायां सिद्धमन्त्रे प्रग्रहेऽर्करथार्वणि ।
वक्त्रे कुर्कुटमूर्ध्नीन्दुबिम्बे ब्रह्मेश-विष्णुषु ॥ १६ ॥

को ब्रह्मा अनिला-ऽर्का-ऽग्नि-चित्त-धी-यम-केकिषु ।
वि[2]ष्णा (ष्ण्वा) वाहनशब्देऽब्धौ सितवर्णे वसौ द्युतौ ॥ १७ ॥

कं शिरो-ऽम्बु[3]-सुखे क्लीबे तत्रैव च कमव्ययम् ।
किं प्रश्ना-ऽऽक्षेप-कुत्सासु वितर्के च त्रिलिङ्गकः ॥ १८ ॥

किमव्ययं च कुत्सायां विकल्प-कुत्सयोरपि ।
कुः स्त्री भुवि कु पापेऽल्पे कुत्सायां वारणेऽव्ययम् ॥ १९ ॥

खः पुमान् गरुडे खड्गे स्वर्गे शान्तरसे कुणौ ।
खमिन्द्रिय-सुख-व्योम-नक्षत्र-क्षेत्र-पट्टणे ॥ २० ॥

कूपा-फलकयोः शून्यबिन्दौ [4]संवेश-रन्ध्रयोः ।
गं गीते गा च गाथायां गो गन्धर्व-गणेशयोः ॥ २१ ॥

---

१ घ. कुक्कुटमूर्द्धेन्दुः । २ ङ वीणावाह(द)नशब्दे । ३ ङ ०म्बुमुखे । ४ क. ख. घ. ङ. संवेस० ।

गौर्नाके वृषभे चन्द्रे वाग्-भू-दिग्-धेनुषु स्त्रियाम् ।
द्वयोस्तु रश्मि-दृग्-बाण-स्वर्ग-वज्रा-ऽम्बु-लोमसु ॥ २२ ॥
मेघे निदाघे किङ्किण्यां घण्टायां घट्टने च घः ।
घं वाद्या-ऽमृतयोर्घा भूर्वार्तायां घो तु घस्त्रिषु ॥ २३ ॥
ङं क्लीबमञ्जने ना तु भैरवे विषये जने ।
चस्तुरुष्के स्वरे चौरे चकोरे चन्द्रमस्यपि ॥ २४ ॥
चा[1] स्त्री शोभा शोणिते तु चं क्लीबे विमले त्रिषु ।
छो[2] भान्वाच्छादना-ऽब्जेषु छं क्लीबे संवृतौ पुमान् ॥ २५ ॥
त्रिष्वयं निर्मले नित्ये मलिने भेदकेऽपि च ।
जो जवे विषये मेरौ शब्दे जेतरि मत्सरे ॥ २६ ॥
जा स्त्रियां देववाहिन्यां योनि[3]-सागरवेलयोः ।
जं कटीभूषणे पत्न्यां तेजस्यम्बुनि जन्मनि ॥ २७ ॥
जीः कीर्त्त्यां संवरे जूर्ना जवे व्योम-पिशाचयोः ।
जः स्त्री वाण्यां झशब्दस्तु पुमान् धातरि हंसके ॥ २८ ॥
प्रतापे भ्रमरे[4] नष्टे चौरे झञ्झानिले मंदे[5] ।
ञो व्यूहे विषये गर्वे लेपे मूर्ध्नि खरध्वनौ ॥ २९ ॥
त्रिषूत्ताने मूढरूपे क्लीबे तु भय-पद्मयोः ।
ज्ञः प्राज्ञे त्रिषु ना चन्द्रसूनावात्मनि वेधसि ॥ ३० ॥
टः पुमान् करटे धूमे तापेऽर्कविवरे ध्वनौ ।
कवाटा-ऽऽवर्त्तयोः सूनौ भू-व्यावृत्त्योस्तु टा स्त्रियाम् ॥ ३१ ॥
ठः शङ्करे बहुध्वाने ठं क्लीबे चन्द्रमण्डले ।
स्तम्भने साहसे चाथ त्रिषु शून्ये शठे दृढे ॥ ३२ ॥

---

१ घ. चा स्त्री-शोभा-शोणितेषु. । २ क. घ. ङ. छलित्वाच्छा° । ३ ख. ग. जो निशाकर-वेलयोः. । ४ ङ. ०रेऽनिष्टे. । ५ घ. गदे. ।

डः पुमान् विषये शम्भौ हासे त्रासे क्षये ध्वनौ ।
शङ्खध्वनौ रौद्ररसे व्रीडा-वाचोस्तु नैः (डः) स्त्रियाम् ॥ ३३ ॥
डं क्लीबे डामरे दुर्गपथे डॆमरुकेऽपि च ।
अन्दोलने च त्रिषु तु डशब्दो गायने जडे ॥ ३४ ॥
ढः पिशाचे भये काले रागे पान्थे ध्वनौ च ना ।
ढक्कायां तु स्त्रियां क्लीबे ज्ञाने तूर्यमुखेऽपि ढम् ॥ ३५ ॥
त्रिष्वयं निर्गुणे गूढे सौम्ये सव्या-ऽपसव्ययोः ।
णशब्दस्तु पुमान् जारे भैरवे कङ्कटे ध्वनौ ॥ ३६ ॥
णा स्त्रियां रजनी-शय्या-धेनु-नासा-कृपासु च ।
णं सरोजदले ज्ञाने त्रिषु निस्तुषवस्तुनि ॥ ३७ ॥
तशब्दः पुंसि सम्भोगे निश्चये कोप-पुच्छयोः ।
धातुवादविधौ चौरे करुणायां तु ता स्त्रियाम् ॥ ३८ ॥
तत्शब्दः प्रकृतार्थोक्तौ त्रिषु हेतौ तदव्ययम् ।
तेशब्दः क्रीडने स्त्री स्यात् क्रीडके त्वभिधेयवत् ॥ ३९ ॥
तृद् पिपासेहयोः स्त्री स्यात् थः पुंस्यूर्मि-गिरीन्दुषु ।
स्त्रीलिङ्गोऽयं तरङ्गिण्यां क्लीबे भयनिवारणे ॥ ४० ॥
वाच्यलिङ्गस्तु धवले श्यामले पृथुलेऽपि च ।
दः पुंसि दातरि च्छेदे दा स्त्रियां क्षान्ति-दानयोः ॥ ४१ ॥
दं क्लीबे दान-वैराग्य-कलत्रेष्ववलोकने ।
भेद्यलिङ्गस्त्वयं मूके गृहीते द्रावके शुचौ ॥ ४२ ॥
दर्शन-ज्ञान-नेत्रेषु दृक् स्त्री द्रष्टरि तु त्रिषु ।
धः पुंसीन्द्रे ध्वनौ ध्याने श्रीदे धन्वन्तरे घने ॥ ४३ ॥
धं वेश्मनि धने ध्याने बुद्धौ स्त्री धा च धिश्च धीः ।
धूर्ना धूपे स्त्री तु कम्पे वित्ते भारे युगाऽग्रयोः ॥ ४४ ॥

---

१ क. ख. घ. ङ. न स्त्रियाम् ॥ २ क. ख. ग. डमरुगे ॥

हेरम्बे नः पुमान् ना स्त्री नाभौ नं ज्ञान-संज्ञयोः ।
वर्ष्म-सूक्ष्मा-ऽपरिक्लिष्ट-शून्या-ऽभिन्नेषु नस्त्रिषु ॥ ४५ ॥
नुशब्दस्तु स्तुतौ स्त्री स्यात् नौः स्त्री तरणि-कालयोः ।
पः पुमान् पवने शैले प्रकाशे कौस्तुभे क्षणे ॥ ४६ ॥
शुभलग्नेऽप्ययं क्लीबे हेम्नि पा यातृ-पानयोः ।
स्त्रीलिङ्गे त्वम्बुधारायां सुधायां सम्मतौ च पाः ॥ ४७ ॥
पस्त्रिष्वार्त्तौ प्रपन्ने च पूः स्त्री पुर-शरीरयोः ।
पूरणे चाथ पुंशब्दः पुरुषे परमात्मनि ॥ ४८ ॥
फो झञ्झानिले आस्वादे फूत्कारे[1] वारणे रणे ।
फा स्त्रियां निष्ठुरोक्तौ च कला-केका-कुटीषु च ॥ ४९ ॥
अथ स्फारे परोक्षे च फशब्दो वाच्यलिङ्गकः ।
बः कुम्भे वरुणे बिन्दौ विकल्पे खे गुरौ मदे ॥ ५० ॥
विभूतिकारे कलहे पक्षिगर्भे च पर्वणि ।
बा स्त्रियां काहली-वल्ली-शृङ्खलास्वमले त्रिषु ॥ ५१ ॥
भः शम्भौ भ्रमरे भावे शुक्रेऽशौ जलदे पुमान् ।
भा तु [2]व्यलङ्कृतौ दीप्तौ स्त्रियां भाः किरणे द्युतौ ॥ ५२ ॥
क्लीबे तु गगने राशौ तारायां पुण्ड्र-वक्त्रयोः ।
भीः स्त्री भीत्यां खगे पुंसि स्थान-भूम्योस्तु भूः स्त्रियाम् ॥५३॥
मः शम्भौ धातरीन्दौ ना चन्द्रे मासे च माः पुमान् ।
मा स्त्री माने मृतौ वेला-मेधा-श्री-मद्य-मातृषु ॥ ५४ ॥
माऽव्ययं प्रतिषेधे च जने तु स्यान्नपुंसकम् ।
मुः पुंसि बन्धने पिङ्ग-पिङ्गलाभिधवर्णयोः ॥ ५५ ॥
यस्त्यागे निलये वायौ यमे दातरि पातरि ।
या स्त्रियां [3]यान-मञ्जर्योः शोभा-लक्ष्म्योश्च निर्मितौ ॥ ५६ ॥

---

१ ख. घ. ङ. पूत्कारे० ॥ २ घ. अलङ्कृतौ. । ३ क. दान० ।

यत्शब्दः सर्वनामाख्ये त्रिषु हेतौ यदव्ययम् ।
ख्या स्त्री ख्यातौ प्रकथने ज्या मौर्वी-मातृ-भूमिषु ॥ ५७ ॥
द्युर्ना दिव्यह्नि वह्नौ च स्वर्व्योःनोर्द्यौ-दिवौ स्त्रियाम् ।
रः पुमान् पावके[1] कामे क्षये वज्रे शबेऽप्यृतौ ॥ ५८ ॥
रा स्त्रियां हेम्नि शालायां ना शंसायां गतावपि ।
रं क्लीबे रुधिरे मूर्ध्नि ध्यान-व्योमा-ऽण्ड-कुक्षिषु ॥ ५९ ॥
चक्रे भये च त्रिषु तु विरसे स्त्यान-तीक्ष्णयोः ।
रास्तु द्वयोर्धने स्वर्णे रीशब्दस्तु स्रवे[2] क्षये ॥ ६० ॥
स्त्री रुग् ज्वालेच्छयोः कान्तौ रुर्ना युद्धे भवे ध्वनौ ।
स्त्री कामिनी-वम्रि(र्मि)कयोः रू स्वर्णे कामरूपिणि ॥ ६१ ॥
श्रीर्वेष-रचना-शोभा-सम्पत्-सरल-शाखिषु ।
वाणी-लक्ष्मी-लवङ्गेषु विषे बिल्वेऽप्यथ त्रिषु ॥ ६२ ॥
जटायां प्रास्तरणे स्त्री स्रुग् द्योमार्गे गतौ स्त्रियाम् ।
लः खण्डले त्रिष्वादाने स्त्री नेन्द्रे लवणे तु लम् ॥ ६३ ॥
वः पुमान् सान्त्वने वायौ[3] संयमे वरुणे स्मरे ।
विश्वक्षुषि व्योम्नि वाते परमात्मनि पक्षिणि ॥ ६४ ॥
वैश्यजने पुरीषे विट् क्रमात् पुंसि द्वयोः स्त्रियाम् ।
स्वोऽस्त्री धने पुमान् ज्ञातौ त्रिष्वात्मीये स्वमात्मनि ॥ ६५ ॥
स्वरव्ययं च त्रिदिवे त्विट् कान्ति-ज्वालयोः स्त्रियाम् ।
वल्के लवङ्गवल्के त्वग् द्वार्द्वारोपाययोः स्त्रियाम् ॥ ६६ ॥
शो वल्मीके शिवे कूर्मे भूपे शिष्ये तनूकृतौ ।
शा स्त्रियां देवपूजायां शक्तौ शोभा-वरेण्ययोः ॥ ६७ ॥
रमायां वाऽथ शं क्लीबे शास्त्रे श्रेयसि मङ्गले ।
कीर्त्तौ शक्त्यायुधे स्वर्गे शः परोक्षे त्रिलिङ्गकः ॥ ६८ ॥

---

१ ङ. याचके । २ घ. श्रवे । ३ घ. शयौ ङ. कपौ ।

शमव्ययं च सौख्यार्थे शिः शम्भौ विवशा-ऽन्तयोः ।
शीर्वाण-हिंसा-स्वापेषु षः स्वर्गे विषये च ना ॥ ६९ ॥
षा स्त्री रमायां षं क्लीबे गर्भमोक्षा-ऽवसानयोः ।
मर्षणे च त्रिलिङ्गस्तु परोक्ष-श्रेष्ठयोरयम् ॥ ७० ॥
सः पुंस्युमासुते वायौ देहकान्तौ तु सा स्त्रियाम् ।
सं क्लीबे स्यन्दनपथे ज्ञाने ध्याने निवारणे ॥ ७१ ॥
सन् सत्ये विदुषि श्रेष्ठे साधौ भवति च त्रिषु ।
सं क्लीबमृक्षे सूशब्दः प्रेरणे गर्भमोचने ॥ ७२ ॥
सेशब्दः सेवने स्त्री स्यात् सेवके त्वभिधेयवत् ।
हः शङ्करे हरौ हंसे रण-रोमाञ्च-वाजिषु ॥ ७३ ॥
गर्वे प्रचेतसि स्त्री तु हा त्यागे गति-वीणयोः ।
हं क्लीबमस्त्र-मुखयोः कणिते मणिरोचिषि ॥ ७४ ॥
परब्रह्मा-ऽऽमन्त्रणयोस्त्रिषु तून्मत्त-हासयोः ।
क्षः संरोधे विशेषे च क्षेम-दुःस्वप्नयोश्च ना ॥ ७५ ॥
क्षा स्त्री क्षमायां निद्रायां क्षं क्लीबे क्षेत्र-रक्षसोः ।
अप्राचुर्यात् प्रयोगस्य लिङ्गं क्वचिदुपेक्षितम् ।
एकाक्षरेषु शब्देषु तदूह्यं लक्ष्यवेदिभिः ॥ ७६ ॥ ॥ षट्पदी ॥
इति जगदुपकारिण्यामिरुगपदण्डाधिनाथरचितायाम् ।
एकाक्षरकाण्डोऽयं पूर्णो नानार्थरत्नमालायाम् ॥ ७७ ॥

॥ इति इरुगपदण्डाधिनाथरचितायां नानार्थरत्न-मालायाम् एकाक्षरकाण्डोऽयं सम्पूर्णः [६] ॥

[७] आचार्यश्रीहेमचन्द्रविरचितानेकार्थसङ्ग्रहान्तर्गत

एकस्वरकाण्डः।

ध्यात्वाऽर्हतः कृतैकार्थशब्दसन्दोहसङ्ग्रहः ।
एकस्वरादिषट्काण्ड्या कुर्वेऽनेकार्थसङ्ग्रहम् ॥ १ ॥

अकारादिक्रमोऽत्रादौ ककारादिक्रमोऽन्ततः ।
उद्देश्यवचनं पूर्वं पश्चादर्थप्रकाशनम् ॥ २ ॥

यत्रैक एव रूढोऽर्थो यौगिकस्तत्र दर्श्यते ।
अनेकस्मिंस्तु रूढेऽर्थे यौगिकः प्रोच्यते न वा ॥ ३ ॥

पदानां भङ्गतो योऽस्मिन्ननेकार्थः प्रकाशते ।
प्रदर्शनीयो नैवासौ तस्यानन्त्यप्रसङ्गतः ॥ ४ ॥

को ब्रह्मण्यात्मनि रवौ मयूरेऽग्नौ यमेऽनिले ।
कं शीर्षेऽप्सु सुखे **खं** स्वः संविदि व्योमनीन्द्रिये ॥ ५ ॥

शून्ये बिन्दौ सुखे **खस्तु** सूर्ये **गौरु**दके दृशि ।
स्वर्गे दिशि पशौ रश्मौ वज्रे भूमाविषौ गिरि ॥ ६ ॥

त्वग् वल्कले चर्मणि च **न्यग्** निम्ने नीच-कार्त्स्न्ययोः ।
रुक् शोभा-किरणेच्छासु **वाग्** भारत्यां वचस्यपि ॥ ७ ॥

जूराकाशसरस्वत्यां पिशाच्यां जवनेऽपि च ।
ज्ञः स्याद् विचक्षणे पञ्चासने चान्द्रमसायनौ ॥ ८ ॥

सद् विद्यमाने सत्ये च प्रशस्ता-ऽर्चित-साधुषु ।
भः शुक्रे **भमु**डौ **भां**ऽशौ **भूस्तु** भूमिरिव क्षितौ ॥ ९ ॥

स्थाने च **मः** पुनः शम्भौ **मा** लक्ष्म्यां वारणेऽव्ययम् ।
किं क्षेप-निन्दयोः प्रश्ने वितर्के **ज्या** तु मातरि ॥ १० ॥

क्ष्मा मोर्व्योर्**द्यु**र्दिने वह्नौ **द्यौ**स्तु स्वर्गे विहायसि ।
रस्तीक्ष्णे दहने **रा**स्तु सुवर्णे जलदे धने ॥ ११ ॥

द्रूः कामरूपिणि स्वर्णे धूर्यानमुख-भारयोः ।
पूः शरीरे नगरे च श्रीर्लक्ष्म्यां सरलद्रवे ॥ १२ ॥
वेषोपकरणे वेषरचनायां मतौ गिरि ।
शोभा-त्रिवर्गसम्पत्त्योः स्रूः स्रवे निर्झरेऽपि च ॥ १३ ॥
वः पश्चिमदिगीशे स्यादौपम्ये पुनरव्ययम् ।
द्यौः स्वर्ग-नभसोः स्वो ज्ञात्यात्मनोः स्वं निजे धने ॥ १४ ॥
दृग् द्रष्टृ-दर्शन-ध्यक्षिण विट् प्रवेशे नृ-वैश्ययोः ।
तृट् तृष्णावत् तर्षवच्च भवेल्लिप्सा-पिपासयोः ॥ १५ ॥
त्विट् शोभायां जिगीषायां व्यवसाये रुचौ गिरि ।
भाः प्रभावे मयूखे च मास् तु मासे निशाकरे ॥ १६ ॥

॥ इत्याचार्यश्रीहेमचन्द्रविरचितेऽनेकार्थसङ्ग्रहे
एकस्वरकाण्डः प्रथमः [७]

---

[८] सुधाकलशमुनिविरचिता एकाक्षरनाममाला ।

श्रीवर्धमानमानम्य सर्वातिशयै[१]शालिनम् ।
एकाक्षरनाममालां कीर्तयामि यथाश्रुतम् ॥ १ ॥

अः पुंल्लिङ्गः शार्ङ्गधारिण्यः स्वल्पार्थेऽव्ययः पुनः ।
[२]विरञ्चावाश्च पुंल्लिङ्ग आ वाक्ये स्मरणेऽव्ययः ॥ २ ॥

आः सन्तापेऽव्ययः क्रुध्यामव्ययो[३]ऽवधृतौ स्मृतौ ।
इः कामे पुंल्लिङ्ग इ चाव्ययः कोपोक्ति-खेदयोः ॥ ३ ॥

ईः पद्मायामव्ययस्त्वी प्रत्यक्षे दुःखभावने ।
प्रकोपे सन्निधौ चैव पुंल्लिङ्ग उर्वृषध्वजे ॥ ४ ॥

रोषोक्तौ मन्त्रणेऽप्यर्थेऽव्यय उं त्वव्ययस्तथा ।
प्रश्ने चौ[४]ङ्गीकृतौ रोषे पुंल्लिङ्ग ऊस्तु रक्षणे ॥ ५ ॥

ऊमव्ययः [५]प्रकोपोक्तौ प्रश्ने ऋर्देवमातरि ।
अव्ययः ऋ तु कुत्सायां वचनेऽपि तथैव च ॥ ६ ॥

ॠस्त्वऽजे दानवाञ्छायां ॠश्च स्याद् देवमातरि ।
ॠर्वाराह्यां भवेदेस्तु विष्णावैस्तु वृषध्वजे ॥ ७ ॥

ओरूर्ध्वलिङ्ग आहूतावव्ययः स्यादनन्त ओ ।
संबोधने चाव्यय औ परब्रह्मण्यमः शिवे ॥ ८ ॥

कः सूर्य-मित्र-वाय्वग्नि-ब्रह्मा-ऽऽत्म-यम-केकिषु ।
प्रकाश-वक्त्रयोश्चापि कं नीर-सुख-मूर्धसु ॥ ९ ॥

कुर्भू-कुत्सितशब्देषु पापीयसि निवारणे ।
ईषदर्थे च किंशब्दः कुत्सने क्षेप-प्रश्नयोः ॥ १० ॥

---

१ घ. ङ. च. ०यसुन्दरम् । २ घ. च. विरिञ्चावाश्च । ३ घ. ङ. च. ०योऽप्यधृतौ । ४ घ. ङ. च. चाङ्गीकृते । ५ च. प्रकर्षोक्तौ ।

वितर्का-ऽऽश्चर्य-निन्दासु किंशब्दः स्यात् कियानपि ।
खमिन्द्रिय-स्वर्ग-शून्य-भूपा-ऽऽकाश-सुखेषु च ॥ ११ ॥
संविदि शून्यखण्डे च वर्त्तते खश्च भास्करे ।
गो गन्धर्वे गणेशे च गीते गं गश्च गातरि ॥ १२ ॥
गौर्वाणी-बाण-भू-रश्मि-वज्र-स्वर्गा-ऽक्षि-वारिषु ।
दिशि धेनौ श्रुतैश्वर्यां गणेशे चापि गौः स्मृतः ॥ १३ ॥
घः कुम्भे हनने घोषा-ऽन्तर्भाव-किङ्किणीष्वपि ।
ङो विषये भैरवे च चस्तरौ चन्द्र-चौरयोः ॥ १४ ॥
चुश्चकोरे समाख्यातश्चकारः पुनरव्ययः ।
अन्योन्यार्थे विकल्पार्थे समासे पादपूरणे ॥ १५ ॥
पक्षान्तरे समूहार्थे हेतावष्धृतावपि ।
अन्वाचये तथा तुल्ययोगितायां च कीर्तितः ॥ १६ ॥
छः सूर्ये छेदके ख्यातस्तथा संवरणे भवेत् ।
छं[३] च छन्दसि तडिति निर्मले च तथा स्मृतः ॥ १७ ॥
जश्च जेतरि जनने विगते जिस्तु जेतरि ।
जूर्विहायसि जवने[४] पिशाच्यां विगतेऽपि च ॥ १८ ॥
झो नक्तं गायने नष्टे घर्घरध्वनिनामनि ।
चारुवाक्-चारयोर्झस्तु व्यूहने गूढरूपके ॥ १९ ॥
टः पृथिव्यां ध्वनौ वायौ करङ्के टं पुनर्भुवि ।
चकोरेऽब्दे तथा ठस्तु घटे शून्ये बृहद्ध्वनौ ॥ २० ॥
चन्द्रस्य मण्डले रुद्रे डो वृषाङ्के ध्वनावपि ।
बन्दिवृन्दे तथा डः स्याद् यामिनीपतिमण्डले ॥ २१ ॥
ढो ढक्कायां समाख्यातस्तथा ढा निर्गुणे ध्वनौ ।
णः प्रकटे निष्फले च प्रस्तुते ज्ञान-बन्धयोः ॥ २२ ॥

---

१ ग. मातरि । २ क. सुखे सखे । ३ क. ख. छं तु । ४ ख. वाण्यां च पिशाच्यां जवनेऽपि ।

तकारस्तस्करे युद्धे क्रोडे[1] पुच्छे च ता श्रियाम् ।
तु स्यात् पूर्वनिवृत्तौ च पूर्वस्मादवधारणे ॥ २३ ॥
विलक्षणे विकल्पार्थे थो भवेद् भयरक्षणे ।
भूधरे च तथा भारे दो दाने दायकेऽपि च ॥ २४ ॥
दाने दातरि दा केचिद् विदुर्दी छेदे[2]-बन्धयोः ।
दं कलत्रं तथा धं च धीरे च धनदे धने[3] ॥ २५ ॥
धश्च चित्रेऽश्ववारे च धीर्बुद्धाविषुधावपि ।
गुह्यकेशे विरिञ्चौ[4] धा तथा धूर्भार-कम्पयोः ॥ २६ ॥
धूते धुराकम्पने च नो बुद्धौ ज्ञान[5]-बन्धयोः ।
अस्मानस्मभ्यमस्माकमेषां स्थाने भवेच्च नः ॥ २७ ॥
निषेधार्थेऽव्ययौ नो च नकारश्च नरस्तु ना ।
निः श्रुते नेतरि ख्यातो नुः[6] स्तुतौ च प्रकीर्त्तितः ॥ २८ ॥
निः स्यात् क्षेपे[7] च नित्यार्थे भृशार्था-ऽऽश्रय-राशिषु ।
कौशले बन्धने मोक्षे संशये दारुकर्मणि[8] ॥ २९ ॥
अधोभावोपरमयोः सन्निधानेऽव्ययो मतः ।
नुः प्रश्ने च वितर्के च विकल्पेऽनुशये[9]ऽव्ययः ॥ ३० ॥
तरण्यां नौस्तथा ख्यातः पः पाने पवने पथि ।
प्रौढे च वर्णके पश्च पा पातरि तथा श्रुते ॥ ३१ ॥
फकारो निष्फले जल्पे पुष्करे भयरक्षणे ।
फं[10] फा वाते फले फेने फूत्कारे[11] फूस्तथोदितः ॥ ३२ ॥

---

१ क. क्रोधे । २ ङ. वेध-बन्धयोः । ३ ग. ध्वने । ४ ख. ग. घ. विरञ्चौ । ५ ग. ज्ञानमन्दयोः । ६ क. ख. नुः स्तुतावव्ययोस्तु नौ । ग. नुस्तुताव्ययोस्तु नो । ७ ख. ग. क्षये । ८ ख. ग. दानकर्मणि । ९ क. ये पुनः । १० क. ख. ङ. झञ्झावाते । ११ ख. ग. पूत्कारे ।

बः[1] कुम्भे वरुणे पद्मे कलहे विगतौ तथा ।
भश्चालि-शुक्रयोर्भावे भा च दीप्तौ भये तु भीः ॥ ३३ ॥
भं धिष्ण्ये भूर्भुवि स्थाने मश्चन्द्रे च विधौ शिवे ।
मौलौ च बन्धने मूः स्यान्मा माने वारणे[2]ऽव्ययः ॥ ३४ ॥
सोभासूं सब कहत है, पक्ष सबदसूं जांन ॥ १० ॥
छं निरमल सब ही कहै, बहुर बीजुरी देष ।
छेदनहकूं कहत कवि, पुनि जु संबर लेष ॥ ११ ॥

कहत जकार जु वेगसूं, अरु जु तेजसूं कोय ।
पूजाहूंसूं सब कहै, जेता जय वह होय ॥ १२ ॥
कहत झकार जु भैरवह, बहुर नष्ट कहुँ सोय ।
पुनि झकार वंचक कह्यौ, घरघर स्वर ही होय ॥ १३ ॥
मूढ रूप विषयातमा, अरु जु गायन हि गाय ।
झरजर स्वरसूं कहत है, सबै ञकार बनाय ॥ १४ ॥
ट पृथिवीसूं कहत कवि, टं वायस बहु जांन ।
कहत टकार जु ईश्वरी, वरहु जु स्वस्तन मांनि ॥ १५ ॥
कहत ठकार विसालसूं, पुनि धनसूं सब कोय ।
चंदमंडल ठं कहत कवि, ड संकरधुनि होय ॥ १६ ॥
ढक्काकूं ढ कहत कवि, ध्वनि निगूढ कह जांन ।
पुनि णकार कहि जांनसूं, अरु जु स्तुति कहुँ आंन ॥ १७ ॥
चोर क्रोध पुनि पुछि कहुँ, कहुँ तकार दे चित्त ।
भयरक्षण जु थकार कहुँ, सिला समूही मित्त ॥ १८ ॥
वेद दांन दातारसूं, अरु कलित्र द मांनि ।
धांन धात धन बंधन हि, कहत धकार सु जांनि ॥ १९ ॥
कहत जांन विश्वास पुनि, अरु जु निषेद नकार ।
नौ नावकहू कहत है, पंडित समझ निहार ॥ २० ॥
पवन पातरि पावन कहुँ, कहुँ पकार नित मित्त ।
रण्य सुसुप्त फकार कहुँ, प्रगट जु तिन कहुं नित्त ॥ २१ ॥
झंझावाय फकार कहुँ, कहुँ फकार भयरक्ष ।
निष्टजला सु फकार कहुँ, अरु फकार ही दक्ष ॥ २२ ॥
फूंकारे फूं कहत कवि, अफळ वचन फू आहि ।
पुनि बकार संग्राम कहि, अरु प्रवेस कहुँ मांहि ॥ २३ ॥

भ नक्षत्र पुनि भ्रमर, भ दीपत भानू भूम ।
भयकारण भी कहत सब, ता कहुं चित्त न झूम ॥ २४ ॥
चंद्र रुद्र सिर मा कहत, मा लच्छी परमान ।
माल मात अष्णा....मी, मुनि बंधन मू जांनि ॥ २५ ॥
मं जम काल यकार कहि, सूर श्रेष्ठ मन मांन ।
जांन जात अरु त्याग कहुं, बुधजन कहत सुजांन ॥ २६ ॥
काम अनल अरु वज्र पुनि, शब्द रूप धर चित्त ।
कहुँ रकार जल स्रवनको, रट्टन भय कहुं नित्त ॥ २७ ॥
इंद्र लवन दत व्याज पुनि, कहि लकार परसिद्ध ।
ली श्लेषम लयसूं कहै, लः निस्तक कहुं व्रिद्ध ॥ २८ ॥
सांत्वन वरनु रवी त कहुं, कहुं वकार समरत्थ ।
गति नय नर अरु श्रेष्ठ पुनि, कहुं वकारके अर्थ ॥ २९ ॥
कहत सकार परोखकूं, पुनि सोभा अति श्रेष्ठ ।
शं कल्यानह कहत है, संजुक्त ति पुनि श्रेष्ठ ॥ ३० ॥
सयनकाज सी कहत कवि,....वीदो(?)हंसा मान ।
कहत षकार परोखकूं, झाल खरी कहुं ठान ॥ ३१ ॥
कहत षकार जु स्नेहकूं, अरु सूला कहुं मान ।
हरह हकार विचित्र है, हे संबोधन ठान ॥ ३२ ॥
कहत क्षकार जु क्षीमकूं, क्षमा क्षनेका जांन ।
आद अकार क्षकार लौं, यह विध बरनत भांन ॥ ३३ ॥
विदुषन मुख सुनि तरक षट, अष्टादस हि पुरांन ।
नाममाल एकाक्षरी, भाषी रतनूं भांन ॥ ३४ ॥

*

इति श्रीघडोईरा रतनूं वीरभांण कृत एकाक्षरी नाममाला सपूर्णा ॥ सं १९५६ ना वर्षे श्रावणवदि ३ रवौ लिषिता श्रीगोडीजी प्रशादात् ॥

*

॥ ॐ ह्रीँ श्रीँ अर्हँ नमः । ॐ ऐँ नमः ॥

वाचनाचार्यश्रीवल्लभगणिविरचितं

विद्वत्प्रबोधशास्त्रम् ।

[शौभरिकोशद्व्याश्रयकाव्यरूपम्]

(टिप्पणीयुतम् ।)

प्रथमः परिच्छेदः ।

सारदां शारदां देवीं श्रीगुरुं सुगुरुं पुनः ।
प्रणम्य क्रियते शास्त्रं विद्वत्प्रबोधनामकम् ॥ १ ॥
तत्र संयोगिवर्णौघैर्वर्ण्यते वस्तुवर्णना ।
सकर्णलब्धवर्णानां प्रबोधाय प्रबोधदा ॥ २ ॥
तत्राऽस्मिन् प्राक्परिच्छेदे वर्णनं क्रियतेऽधुना ।
गजा-ऽश्व-वृषभादीनां चतुश्चरणधारिणाम् ॥ ३ ॥

क्णातले गजघटा प्रकटेष्टे, क्णाऽऽवलीकृदिव सज्जलदाली ।
क्णापतीन्द्र ! हृदयस्य मोददा, क्णाऽरिराजिरनिशं मददीप्ता ॥ ४ ॥

टिप्पणी—क्णा—भूः तस्याः पतयः, तेषां इन्द्रः तत्सम्बोधने हे 'क्णापतीन्द्र !' नरनाथ ! । क्णायाः—भुवस्तलं तत्र, प्रकटा गजघटा अनिशं ईष्टे । केव ? 'सज्जलदालीव' सन्मेघश्रेणिरिव । किम्भूता सज्जलदाली ? क्णानां—धान्यकणानां आवली तां करोति इति किपि क्णावलीकृत् । किम्भूता गजघटा ? हृदयस्य मोददा । पुनः किम्भूता गजघटा ? क्णा—छिन्ना अरिराजिर्यया सा तथा । पुनः किम्भूता गजघटा ? मददीप्ता ॥ ४ ॥

क्तिप्रभेन्द्र-हरि-काल-नैर्ऋत-क्ता-ऽनिलैलविलकेशदिग्धवाः ।
क्ताबलेन रचयन्ति यत्स्तुतिं, क्तस्फुटा द्विपघटा विभाति सा ॥५॥
क्थालिहद् दशदिशो धृता यतः, क्थं हरन्त्यविकलं तया हि च ।
क्थो नृणां कथयतीत्ययं जनः, क्थेड् ! न किं भवति वै स्वकार्थिकः ? ॥६
॥ युग्मम् ॥

टिप्पणी—क्था—मही तस्यां ईष्टे स्वामित्वेन क्थेड्—राजा तदामन्त्रणं 'हे क्थेट् !' राजन् ! सा द्विपघटा विभाति । किम्भूत हे क्थेट् ! ? क्तिः—सूर्यैः, तद्वत् [प्रभा—]

प्रतापो यस्य स तदामन्त्रणम् । सा का ? यस्याः—द्विपघटायाः स्तुतिः यत्स्तुतिः तां 'रचयन्ति' कुर्वन्ति । के ? इन्द्रश्च हरिश्च कालश्च—यमः नैर्ऋतश्च क्तश्च—वरुणः अनिलश्च—वायुः ऐलविलकश्च—कुबेरः ईशश्च—ईशानः इन्द्र-हरि-काल-नैर्ऋत-क्ता-ऽनिलै-लविलकेशाः, ते च ते दिग्धवाश्च—दिक्पतय इन्द्र-हरि-काल-नैर्ऋत-क्ता-ऽनिलैलविल-केशदिग्धवाः । केन ? क्ता—वाक् तस्या बलं तेन, वाक्पाटवेन इत्यर्थः । दिक्पतयः स्तुतिं रचयन्ति तत्र हेतुमाह—'यतः, यस्मात् कारणात् 'तया' द्विपघटया दशदिशो धृता अतः कारणादेव स्तुवन्तीति । को भावः ? दिशां धारका गजाः, इन्द्राद्याश्च दिशां पतयः, गजाश्च दिशस्तदैव धरन्ति यदा सन्तोषिता भवन्ति, 'सन्तोषित एव कार्यं करोत्यन्योऽपि' इति लोकोक्तिः, अत एव इन्द्रादीनां स्वार्थः, तेन द्विपघटां तावकीं दृष्ट्वा दिग्गजभ्रान्त्या स्तुवन्तीति भावः । 'हि' यस्मात् कारणाद् 'नृणां कथः' मनुष्याणां सङ्घ इति कथयति । इति इति किम् ? अयं जनः 'वै' स्फुटार्थे, अयं जनः 'स्वकार्थिकः' स्वार्थी किं न भवति ? अपि तु भवति इत्यर्थः । काकाऽत्र नञ्, यतो यस्य स्वार्थं भवति स तद्वर्णनं करोत्येव, अतो गजान् दिग्धर्तृत्वेनेन्द्राद्याः स्तुवन्तीति । किम्भूता द्विपघटा ? क्तेन—ज्योतिषा बलकान्त्या स्फुटा क्तस्फुटा । पुनः किम्भूता द्विपघटा ? क्थस्य—दुःखस्य आलिः क्थालिः, तां हरतीति क्थालिहृत् । किं कुर्वाणा द्विपघटा ? 'अविकलं' सर्वं 'क्थं' दैन्यं हरन्ती ॥ ५ ॥ ६ ॥ युग्मम् ॥

क्थावलीहरणतत्परोद्धुरा, क्थावली ह्यलति मञ्जुलोद्बला ।
क्थापते ! तव घनार्जितश्रियः, क्थेन चैव तदवापनं यतः ॥ ७ ॥

टिप्पणी—क्थायाः—भुवः पतिः क्थापतिः, तत्सम्बुद्धौ 'हे क्थापते !' नृप ! तव क्थानां—गजानां आवली क्थावली 'हि' निश्चितम् 'अलति' दीप्यते । किम्भूता क्थावली ? 'क्थावलीहरणतत्परा' दुःखश्रेणिहरणप्रह्वा । 'उद्धुरा' उत्कटा । किम्भूता ? ['मञ्जुलोद्बला'] मञ्जुलं उत्कृष्टं च बलं यस्याः सा तथा । किम्भूतस्य तव ? घनार्जित-श्रियः । 'यतः' यस्मात् कारणात् 'क्थेन' धनेनैव 'तदवापनम्' गजघटाप्रापणं भवति, अत एव घनार्जितश्रीरिति विशेषणम् ॥ ७ ॥

क्मप्रदस्तव गजः स सङ्गरे, क्माधिनाथ ! हरति द्विषां बलम् ।
क्द्वयस्य सुखकारि यद्यशः, क्प्रसद्मविहितस्थितीन्दति ॥ ८ ॥

टिप्पणी—'हे क्माधिनाथ !' हे नृपते ! तव स गजः 'सङ्गरे' युद्धे द्विषां बलं हरति । स कः ? 'यद्यशः' [यस्य] जयकीर्तिः इन्दति "इदु परमैश्वर्ये" । किम्भूतो गजः ? 'क्मप्रदः' उत्सवदाता । किम्भूतं यद्यशः ? 'क्द्वयस्य' कर्णयुग्मस्य सुखकारि । पुनः किम्भूतं यद्यशः ? क्वः—समुद्रास्त एव प्रसद्म तत्र विहिता स्थितिर्येन तत् क्प्रसद्म-विहितस्थिति ॥ ८ ॥

क्मोज्झिता अपि यतीश्वरा यकं, क्मायुताः सततमर्कयन्त्यरम् ।
क्मूप्रभाप्रतिभदन्तसुन्दरः, क्मक्षम ! क्षितिप ! भाति स द्विपः ॥९॥

टिप्पणी–'हे क्षितिप !' भूप ! सः 'द्विपः' गजः भाति । स कः ? यकं यतीश्वरा अपि 'सततं' प्रत्यहं 'अर्कयन्ति' स्तुवन्ति । किम्भूता यतीश्वराः ? 'क्मोज्झिताः' कन्दर्परहिताः । पुनः किम्भूता यतीश्वराः ? कमया–रत्या युताः क्मायुताः । किम्भूतो द्विपः ? क्मूः–शङ्खः तस्य प्रभा तया प्रतिभौ–सदृशौ यौ दन्तौ ताभ्यां सुन्दरो यः स तथा । किम्भूत हे क्षितिप ! ? क्मेषु कर्म[सु] क्षमः–समर्थो यः स तथा तत्सम्बोधनम् ॥ ९ ॥

क्यप्रताप ! नृपतीन्द्र ! तावकः, क्यप्रतप्तघनगोलबिन्दुयुक् ।
क्यब्विलोप इव पञ्चमीं गजः, क्यऽद्भुतेभसम आपताज्जयम् ॥ १० ॥

॥ इति गजवर्णनम् ॥

टिप्पणी–हे नृपतीन्द्र ! तावको गजो जयं 'आपतात्' प्राप्नुयात्, "आप्लृण् लम्भने" यौजादिकः । कां क इव ? पञ्चमीं विभक्तिं 'क्यब्विलोप इव' यथा क्यब्लोपः कर्मणोऽर्थे अधिकरणस्यार्थे च पञ्चमीं विभक्तिं प्राप्नोति तथा गजो जयं प्राप्नुयादित्यर्थः । किम्भूत हे नृपतीन्द्र ! ? क्यः–सूर्यः स इव प्रतापो यस्य स तथा तदामन्त्रणम् । किम्भूतो गजः ? क्यः–अग्निः तेन प्रतप्तो यो घनगोलः–लोहगोलकः तद्वद् ये रक्ता बिन्दवः तैः युग्–युक्तो यः स तथा, रक्तबिन्दुमानित्यर्थः । पुनः किम्भूतो गजः ? किः–इन्द्रः तस्य यः अद्भुतेभः–सम्यग् हस्ती तेन समः–समानो यः स तथा ॥ १० ॥

॥ इति गजवर्णनम् ॥

क्रामति क्षितिपते ! तुरङ्गमः, क्रष्टुमाश्वरिभुवं जयावहः ।
क्रष्टृवच्चतुरताविराजित !, क्रान्तशक्रतुरगप्रभोदयः ॥ ११ ॥

टिप्पणी–'हे क्षितिपते !' नृप ! 'तुरङ्गमः' अश्वः 'क्रामति' पादविक्षेपं करोति । किं कर्तुम् ? 'आशु' शीघ्रम् 'अरिभुवं' रिपुपृथ्वीं 'क्रष्टुं' विलिखितुम् । किंवत् ? 'क्रष्टृवत्' कर्षुक इव, यथा कर्षुको भुवं क्रष्टुं क्रामति तथा । किम्भूतस्तुरङ्गमः ? जयावहः । किम्भूत हे क्षितिपते ! ? चतुरताविराजित ! । पुनः किम्भूतस्तुरङ्गमः ? क्रान्तः शक्रतुरगस्य–उच्चैःश्रवसोऽश्वस्य प्रभोदयः–शोभोदयो येन स तथा ॥ ११ ॥

क्लेशितातुलबलावलोकनक्लेशकारकविपक्षपक्षकः ।
क्लीबतारहितचेतसां विशां, क्लान्तिकृज्जयति भूपते ! हयः ॥ १२ ॥

टिप्पणी—हे भूपते ! हयो जयति । किम्भूतो हयः ? "क्लेशि बाधने" क्लेशितः अतुलबलावलोकनेन क्लेशकारकविपक्षाणां पक्षो येन स तथा । पुनः किम्भूतो हयः ? क्लीवतारहितचेतसां 'विशां' नृणां क्लान्तिकृत् ॥ १२ ॥

क्वाप्यवस्थितिमसावनाप्नुवन्, क्वाथहा हरिहयो हरिं श्रितः ।
क्वां हयोऽसति यदोजसा जितः, क्वाण एष जगतीति वर्तते ॥ १३ ॥

टिप्पणी—'जगति' लोके 'एषः' प्रत्यक्षः 'क्वाणः' शब्द इति वर्तते । इतीति किम् ? स हयः 'क्वां' पृथ्व्यां 'असति' दीप्यते । स कः ? यदोजसाऽसौ 'हरिहयः' उच्चैःश्रवाः जितः सन् क्वापि अवस्थितिमनाप्नुवन् 'हरिम्' इन्द्रं 'श्रितः' आश्रितः । किम्भूतो हयः ? 'क्वाथहा' दुःखहा ॥ १३ ॥

ख्यातकीर्तिरसकौ हयो वरः, ख्याति खल्वविकलं जयं तव ।
ख्यातिमन् नृप ! सुलालिकामिषैः, ख्यान्ति पण्डितजना इति स्फुटम् ॥१४॥

टिप्पणी—पण्डितजना इति स्फुटं 'ख्यान्ति' कथयन्ति । इतीति किम् ? हे नृप ! असकौ हयः तव 'खलु' निश्चितं अविकलं जयं 'ख्याति' आचष्टे । कैः ? 'सुलालिकामिषैः' शोभनलालाव्याजैः । किम्भूतो हयः ? ख्यातकीर्तिः । पुनः किम्भूतो हयः ? वरः । किम्भूत हे नृप ! ? ख्यातिमन् ! ॥ १४ ॥

खक्षमापतिततिप्रणाशक !, खाधिनाथ ! विचरंस्तुरङ्गमः ।
खं प्रयच्छति तवारिसन्ततेः, खं विनैव कुतुकं त्विदं महत् ॥ १५ ॥

टिप्पणी—'हे खाधिनाथ !' हे भूपाल ! तुरङ्गमः विचरन् सन् तवारिसन्ततेः 'खं' खड्गं विनैव 'खं' मरणं प्रयच्छति, इदं महत् कुतुकम् । किम्भूत हे खाधिनाथ ! ? खाः—दुष्टहृदयाः ये क्षमापतयस्तेषां ततिस्तस्याः प्रणाशकस्तदामन्त्रणम् ॥ १५ ॥

ख्लावली छलति तावदुद्बलं, ख्लावलीव सकलं प्रजाबलम् ।
ख्लाकुला खलु मिलत्यहो ! न भूख्लापते ! तव हयः पुमानिव ॥१६॥

टिप्पणी—भूरेव ख्ला—स्त्री तस्याः पतिस्तदामन्त्रणं हे भूख्लापते ! । 'ख्लावली' दुर्जनश्रेणिः 'उद्बलम्' उत्कृष्टबलं सकलं प्रजाबलं तावत् छलति, यावदिति पदमध्याहार्यम्, 'अहो !' इत्याश्चर्ये, 'खलु' निश्चितं तव हयः पुमानिव न मिलति ॥ १६ ॥

ग्याङ्गजावितवराः सुवागरा, ग्यं यदीयमनिशं स्तुवन्त्यरम् ।
ग्यद्भुतोदितजय ! प्रदीप्यते, ग्यद्विषन् ! स तुरगो महीपते ! ॥ १७ ॥

ग्रस्तसङ्गररुजां सुभूभुजां, ग्रावराजसमधैर्यसंयुजाम् ।
ग्रासवन्मदकरोऽरिसम्पदा, ग्राममाशु हरतीश ! ते हयः ॥ १८ ॥

॥ इति अश्ववर्णनम् ॥

ग्लानतारहितपीनभूघनो, ग्लौलसत्किरणकोटितुल्यरुक् ।
ग्लायति प्रबलमाश्वशं यतो, ग्लौगुणेश ! नृप ! भाति गौः स ते ॥१९॥
ग्वः प्रदीप्यत इलापतेऽनिशं, ग्वावलीषु सबलोऽमलाङ्गरुक् ।
ग्वाधिनाथ ! वृषभप्रमोदयो, ग्वद्भुताङ्ग ! वसुधापते ! तव ॥ २० ॥
घ्नप्रदाभनिनदो नदन्नरं, घ्नातिदीप्तिततियुक् ककुद्युतः ।
घ्नोऽतिदुष्कृततर्विराजते, घ्नामणिप्रतिभ ! भूप ! ते वृषः ॥ २१ ॥
घ्याशयान्तरसिताङ्गदीधितिर्घ्यङ्घ्रुतेन्द्रजनचित्तहर्षदः ।
घ्यादिदेवविसराः स्तुवन्त्यरं, घ्यर्क्यरुग् यमसते वृषः सकः ॥ २२ ॥
घ्रप्रभो ! गुणसुमङ्गलश्रिया, घ्रं वरं प्रविदधान इन्दति ।
घ्राणभूषणयुतो महातनुर्घ्रानन ! क्षितिप ! तावको वृषः ॥ २३ ॥
घ्लारोहसन्दोहफलीकृताज्ञ !, घ्लौजोविराजी नृप ! राजते ते ।
घ्लोर्जस्व्यनड्वान् वृषभो वृषेभो,घ्लालीलसल्लक्षणलुब्धचेतः ॥ २४ ॥
घ्वेतिनिस्वनमिषेण मेघजं, घ्वं जयंश्च विदधाति ते स्तुतिम् ।
घ्वीश्वर ! त्वदतनुस्फुरद्गुणघ्वादनेन सुमना वृषोऽसकौ ॥ २५ ॥
ङ्राधिनाथ ! जनयत्ययं वृषोऽङ्रप्रधानमुदमुत्तमां नृणाम् ।
ङ्रावलीं शरणदायकाग्रणीङ्रोङ्घ्रुरो रथधुरन्धरोत्तरः ॥ २६ ॥
च्यावयन् धवलपद्ममण्डलीं, च्योतिताऽपरसितार्थकान्तिभिः ।
च्यावयत्यतनुभारमुङ्कुरां, च्यातिसुन्दरगते ! महीपते ! ॥ २७ ॥

॥ इति वृषभवर्णनम् ॥

च्रावलीस्तुतगुणौघ ! भूपते ! च्रातिचञ्चुरमहौजसो हरिः ।
च्रापवर्जित उदारसारयुक्, च्रोदितस्य विश एति सम्मदम् ॥ २८ ॥
छ्यौघं यथा चित्रक आशु तुष्यच्छ्यामाङ्गरोचिर्हरति प्रकामम् ।
छ्यारञ्जकोर्वीश !हरिस्तथाऽयं,छ्याढ्यस्त्वदीयो रिपुहस्तिवृन्दम् ॥२९॥

छू इव हन्ति तिरश्च इमां ततिं, छूवियुतो नृपते ! नखरायुधः ।
छूततिनाशविधिप्रवणक्रमः, छूरहिताद्भुतवर्णमणीगण ! ॥ ३० ॥

छ्लोत्कटान् प्रकटकान् सदोल्लसच्छ्लक्ष्णलक्ष्मिकलितानरिद्विपान् ।
छ्लायुतो हरिरयं हिनस्त्यलच्छिष्टकीर्तिकमलाऽचलापते ! ॥ ३१ ॥

छ्वावन् ! महीपाल ! महाबलिष्ठ !, छ्वाद्यासुमत्पालनसावधान ! ।
छ्वज्ञप्ति-मूर्त्ते ! तव भाति भास्वच्छ्वासो हरिः प्राज्ञजनाऽर्कणीयः ॥३२॥

टिप्पणी—छ्वा—छविर्विद्यते यस्य स छ्वावान् तदामन्त्रणम् । छ्वः—छाग आद्यो येषां ते छ्वाद्याः, ते च ते असुमन्तश्च—प्राणिनः छ्वाद्यासुमन्तः, तेषां पालने सावधानो यः स तथा तदामन्त्रणम् । छ्वे—स्वच्छे ज्ञप्ति-मूर्ती यस्य स तथा तत्सम्बोधनम् । ज्ञप्तिः—बुद्धिः ॥३२॥

ज्यायानसौ भाति हरिस्त्वदीयो, ज्यायामतो नास्त्यपरो बलीयान् ।
ज्यानाथविख्यातयशः ! प्रधानेज्यः शोभमानौष्ठविशिष्टवक्त्रः ॥ ३३ ॥

टिप्पणी—'ज्यानाथविख्यातयशः !' भूनाथख्यातकीर्त्ते ! । 'प्रधानेज्यः' शोभनपूजः ॥ ३३ ॥

ज्रज्वालिकातापितहेम-विद्युज्ज्रोद्भासिनेत्रो वरपीवरोरुः ।
ज्रं राजते त्वद्धरिरेष दिव्यो, ज्रश्रीतिरस्कृत्कमलाऽचलेश ! ॥ ३४ ॥

टिप्पणी—ज्रज्वालिकाभिः—अग्निज्वालाभिस्तापितं यद् हेम ज्रज्वालिकातापितहेम, तच्च विद्युच्च ज्रज्वालिकातापितहेमविद्युतौ, तयोरिव ज्रोद्भासिनी—वृद्धदीप्यमाने नेत्रे यस्य स तथा, पीतनेत्रत्वात् सिंहस्य । 'ज्रम्' अजस्रम् । 'ज्रश्रीतिरस्कृत्कमल !' कृष्णश्रीतिरस्कृत्कमल ! । 'अचलेश !' हे महीश ! ॥ ३४ ॥

ज्वालावलीदुस्सहसत्प्रताप !, ज्वाक्रान्तभूपालकलाऽचलेश ! ।
ज्वालाऽऽभचक्षू रसनाऽतिरक्ता, ज्वा दीप्यते यस्य हरिः सकस्ते ॥ ३५ ॥

टिप्पणी—ज्वेन—वेगेन आक्रान्ता भूपालानां कला येन स तथा तदामन्त्रणम् । 'अचलेश' हे भूप ! । ज्वालाभे—ज्वालासदृक्षे चक्षुषी यस्य स तथा । किम्भूता रसना ? 'ज्वा' चञ्चला, लपलपायमानत्वात् । 'ते' तव ॥ ३५ ॥

झ्यानाथतीरे तव यस्य कीर्तिं, झ्यौघाकुले गायति देववृन्दः ।
झ्यैश्वर्यमेकाकिनमाप्नुवन्तं, झ्याढ्याऽवनीनाथ ! हरिं स पश्य ॥ ३६ ॥

टिप्पणी—हे 'अवनीनाथ !' भूपाल ! स त्वं 'हरिं' सिंहं 'पश्य' विलोकय। किं कुर्वन्तं हरिम् ? 'आप्नुवन्तं' प्राप्नुवन्तम् , किं तत् ? 'झ्यैश्वर्यं' हस्त्याधिपत्यम् । झीशब्द ईवन्तो हस्तिवाचक एकाक्षरकोषे [सौ. ए. को. श्लो. ४१]। किंविशिष्टं हरिम् ? एकाकिनम् । स त्वं पश्य । स इति कः ? यस्य तव 'कीर्तिं' यशः देववृन्दो गायति । क ? झ्यानाथतीरे झ्याः—नद्यः तासां नाथो झ्यानाथः—समुद्रः तस्य तीरे—तटे । किम्भूते ? 'झ्यौघाकुले' झ्यानां—द्रहाणाम् ओघः—वृन्दं तेनाऽऽकुलो यः स तथा तस्मिन् । किम्भूत हे अवनीनाथ ! ? 'झ्याढ्य !' कलाढ्य ! । इदन्तो झिशब्दः कलावाचकः [सौ. ए. को. श्लो. ४०] ॥ ३६ ॥

ज्ञ्रां करोत्यरिमृगावलेर्नृप !, ज्ञ्रोर्जधार्यऽविरतं मृगाधिपः ।
ज्ञ्र-स्थिर-प्रवर-वृत्तदंष्ट्रिको, ज्ञ्रातिमुक्तवरकेसरच्छटः ॥ ३७ ॥

टिप्पणी—'ज्ञ्रां' हानिम् । 'मृगाधिपः' सिंहः । किम्भूतो मृगाधिपः ? 'ज्ञ्रोर्जधारी' कठोरबलधारी । ऊर्जशब्दो बलवाची अदन्तोऽप्यस्ति । पुनः किम्भूतो मृगाधिपः ? ज्ञ्राश्च—पुष्टाः स्थिराश्च प्रवराश्च वृत्ताश्च दंष्ट्रा विद्यन्ते यस्य स तथा । पुनः किम्भूतो मृगाधिपः ? ज्ञ्रा—जरा तयाऽतिशयेन मुक्तः—रहितो य स ज्ञ्रातिमुक्तः, स चासौ वरकेसरच्छटश्च ज्ञ्रारहित(ज्ञ्रातिमुक्त)वरकेसरच्छटः ॥ ३७ ॥

झ्वाधवादिमुनिसङ्घसेवक !, झ्वोघचित्तमददायिकीर्तिसन् ! ।
झ्वाझरो नर इवाऽलते बली, झ्वङ्कहृन्नरपते ! हरिस्तव ॥ ३८ ॥

टिप्पणी—हे नरपते ! तव 'हरिः' सिंहः 'अलते' शोभते । किम्भूतः सन् ? 'वली' वलवान् । क इव ? 'झ्वाझरः' दधिभोक्ता नर इव, यथा दधिभोक्ता मर्त्यः बली शोभते तथा । किम्भूत हे नरपते ! ? झ्वा—अरुन्धती तस्या धवः—भर्ता झ्वाधवः—वसिष्ठः, स आदिर्येषां ते झ्वाधवादयः, ते च ते मुनयः तेषां सङ्घः तस्य सेवकः, तदामन्त्रणम् । झ्वूशब्देन देवाः, तेषां ओघस्तस्य चित्तमददायिनी या कीर्तिः तया सन्—प्रधानः, तदामन्त्रणम् । झुश्च—शोकः अङ्कं च—दुःखं ते हरतीति क्विपि झ्वङ्कहृत्, तदामन्त्रणम् ॥३८॥

ञ्युत्तमोच्छ्वसितपुच्छशोभितो, ञ्यग्रणीड्य ! नरनाथ ! तावकः ।
ञ्यारहाश्च रमणीयवीक्ष्यकृद्, ञ्याभताप ! रमतेतरां हरिः ॥ ३९ ॥

टिप्पणी—हे नरनाथ ! तावको हरिः रमतेतराम् । किम्भूतो हरिः ? ञिशब्देन ज्ञानवृद्धाः [सौ. ए. को. श्लो. ४३], तेषूत्तमः तत्सम्बोधनम् । उच्छ्वसित—उदग्र । पुनः किम्भूतो हरिः ? ञिशब्देन सम्राजः [सौ. ए. को. श्लो. ४३], तेषु अग्रण्यः तेषां ईड्यः—स्तुत्यः, तदामन्त्रणम् । ञि—सम्राट्, तच्च तदारं च ञ्यारम्, तद् हन्तीति

ञ्यारहा, “क्विप्” [सि. ५।१।१४८] इत्यनेन क्विप् । वीक्ष्यम्—आश्चर्यं करोतीति वीक्ष्यकृद्, रमणीयश्चासौ वीक्ष्यकृच्च०, सिंहस्यैतद् विशेषणद्वयम् । ञिः—अग्निः तदाभः तापः—प्रतापो यस्य स तथा तदामन्त्रणम् ॥ ३९ ॥

ञ्रावलीक्षितिविधानतत्पर !, ञ्राऽभिरञ्जितमहाप्रजाऽरजः ! ।
ञ्राऽभिभूतगजराज ! राजते, ञ्राभियुक्त ! हरिरेष तावकः ॥४०॥

टिप्पणी—ञ्रावली—चौरश्रेणिः । ञ्राभिरञ्जित—नीत्यभिरञ्जित । अरजः !—निष्पाप ! । ञ्राभिभूत—गतिजित । ‘ञ्राभियुक्त !’ हे नीतिसहित नृप ! ॥ ४० ॥

ट्यानाथ ! दंष्ट्रातिविडम्बितास्यं, ट्याघूर्मितं पश्य सुदृश्यशौर्यम् ।
ट्यालीबलं स्राक् खलु नाशयन्तं, ट्योघारिमेनं मृगराजमग्रम् ॥४१॥

टिप्पणी—ट्या—पृथ्वी तस्या नाथः—स्वामी ट्यानाथः, तत्सम्बुद्धौ ‘हे ट्यानाथ !’ भूपते ! एनं ‘मृगराजं’ सिंहं ‘पश्य’ विलोकय । किं कुर्वन्तम् ? ‘खलु’ निश्चितम्, टीनां—करेणूनां आली—राजी ट्याली, तस्या बलं—स्थाम तत् ‘स्राक्’ शीघ्रं नाशयन्तम् । किम्भूतम् ? दंष्ट्राभिरतिशयेन विडम्बितम्—अलङ्कृतं आस्यं—मुखं यस्य स तथा तम् । पुनः किम्भूतम् ? ट्या—सुरा तया घूर्मितो यः स तथा तम् । पुनः किम्भूतम् ? सुतरां दृश्यं—विलोकनीयं शौर्यं—पराक्रमो यस्य स तथा तम् । पुनः किम्भूतम् ? टीनां—गजानां ओघः तस्यारिर्यः स तथा तम् । ‘अग्रम्’ श्रेष्ठम् ॥ ४१ ॥

ट्रूस्थित ! क्षितिपते ! गजावलीट्रूारवोत्करविराजि राज्यकम् ।
ट्रूतिशब्दवरटोत्करोत्करट्रूाग्रहस्ति तयुदेति तस्य ङोः ॥ ४२ ॥

टिप्पणी—‘हे ट्रूस्थित !’ सिंहासनस्थ ! ‘हे क्षितिपते !’ नृप ! तस्य ‘ते’ तव ‘ङोः’ सिंहः ‘उदेति’ उदयं प्राप्नोति । तस्य कस्य ? यत्तदोर्नित्याभिसम्बन्धाद् यस्य ‘राज्यकं’ राज्यं राजत इति शेषः । किम्भूतम् ? गजावल्या यः ट्रू ट्रू इति आरवः तस्य उत्करः—वृन्दं तेन विराजि यत् तत् तथा । पुनः किम्भूतम् ? ‘ट्रूतिशब्द०’ टं इति शब्दं उत्—प्राबल्येन करोतीति टोत्करः, लोके ‘टोकरउ’ इति प्रतीतिः, ट्रूतिशब्देन वरः—श्रेष्ठः ट्रूतिशब्दवरः, स चासौ टोत्करश्च ट्रूतिशब्दवरटोत्करः, तस्य उत्करः—वृन्दं तस्य यत् ट्रं—शब्दविशेषः तेन अग्राः—श्रेष्ठा हस्तिनो यत्र तत् तथा ॥ ४२ ॥

ट्वाक्षिजन्मसुख ! मुख्यसम्पद !, ट्वेन्द्रियायतन ! भूप ! तावकी ।
ट्वेव सुप्तिसमये रणे सुखं, ट्वं करोति हरिराजिरेषका ॥ ४३ ॥

टिप्पणी—हे भूप ! तावकी ‘एषका’ एषा ‘हरिराजिः’ सिंहावली ‘रणे’ सङ्ग्रामे सुखं करोति । किम्भूतं सुखम् ? ‘ट्वम्’ [illegible] । कस्मिन् केव ? ‘सुप्तिसमये’

शयनकाले 'ट्वेव' खट्वेव, यथा खट्वा शयनकाले सुखं करोति तथैषाऽपि । किम्भूत हे भूप ! ? ट्वः—अत्रिः तस्य अक्षि—नेत्रं ततो जन्म—जननं यस्य सः ट्वाक्षिजन्मा—चन्द्रः, तद्वन्मुखं यस्य स तथा तदामन्त्रणम् । ट्वं—पुष्टं इन्द्रियायतनं—कायो यस्य स तथा तदामन्त्रणम् ॥ ४३ ॥

ठ्यप्रताप ! वसुधापते ! क्षितौ, ठ्यो मनो हरति ते स्वकौजसा ।
ठ्यं वदन्ति खलु कोविदा इति, ठ्यग्र ! दर्शनभयङ्करानन: ॥ ४४ ॥

टिप्पणी—'हे ठ्यप्रताप !' दुस्सहत्वाद् वह्निसमानप्रताप ! 'हे वसुधापते !' भूप ! 'ते' तव मनः 'ठ्यः' हरिः हरति । केन ? 'स्वकौजसा' स्वीयबलेन । 'खलु' निश्चितम् । कोविदा इति 'ठ्यं' वाक्यं वदन्ति । ठीः—कुटुम्बवान् पुत्रवान् वा, स चासौ अग्रश्च तदामन्त्रणम् ॥ ४४ ॥

ठ्रस्वादवच्चित्तमदप्रदः श्रीठ्राविह्वलद्वेषिमृगप्रणाशी ।
ठ्रालीद्धकुम्भस्थलदन्तिभेदी, ठ्रह्लादमीष्टे विदधत् सुसिंहः ॥ ४५ ॥

टिप्पणी—हे नृप ! सुसिंहः ईष्टे । किं कुर्वन् ? 'ठ्रह्लादं' 'ठ्रम्' इति शब्दं 'विदधत्' कुर्वन् । किम्भूतः सुसिंहः ? 'चित्तमदप्रदः' चेतोहर्षदाता । किंवत् ? 'ठ्रस्वादवत्' मिष्टान्नफलरसास्वादवत् । पुनः किम्भूतः सुसिंहः ? श्रीः—लक्ष्मीः सैव ठ्रा—सुरा तया विह्वला ये द्वेषिणः त एव मृगाः तान् प्रणाशयतीत्येवंशीलो यः स तथा । पुनः किम्भूतः सुसिंहः ? ठ्राणां—भ्रमरीणां आली—श्रेणिः तया इद्धः—समृद्धः कुम्भस्थलो येषां ते ठ्रालीद्धकुम्भस्थलाः, ते च ते दन्तिनश्च—गजाः तान् भिनत्तीत्येवंशीलो यः स तथा ॥ ४५ ॥

ठ्वार्कणीयगुणगौरव ! प्रभो !, ठ्वेज्यया विगतभूरिवैरिराट् ! ।
ठ्वग्रगीष्पतिमतिक्षितिप्रद !, ठ्वग्र ! हर्षयति ते मनो हरिः ॥४६॥

॥ सिंहवर्णनम् ॥

टिप्पणी—'हे प्रभो !' स्वामिन् ! 'ते' तव मनः हरिर्हर्षयति । किम्भूत हे प्रभो ! ? ठ्वस्य—वसिष्ठऋषेः अर्कणीयं—स्तवनीयं गुणगौरवं यस्य स तथा तदामन्त्रणम् । पुनः किम्भूत हे प्रभो ! ? 'ठ्वेज्यया' कृष्णपूजया विगतभूरिवैरिराट् ! । पुनः किम्भूत हे प्रभो ! ? ठ्वः—प्रज्ञा तया अग्रः ठ्वग्रः, स चासौ गीष्पतिश्च—बृहस्पतिः तस्य मतिः तस्याः क्षितिं—क्षयं प्रददातीति तथा तदामन्त्रणम् । ठ्वः—धृतिः तया अग्रः ठ्वग्रः, तत्सम्बोधनम् ॥ ४६ ॥

॥ इति सिंहवर्णनम् ॥

ड्यप्रमुक्त ! वृषरक्त ! कोविदेड्यस्फुरद्गुणगण ! क्रमेलकः ।
ड्यं द्विषां गतिविलोकनात् क्षणात्, ड्यर्यभक्त ! तनुते महातनुः ॥४७॥

टिप्पणी—हे 'ड्यप्रमुक्त !' जाड्यरहित !, 'वृषरक्त !' धर्मनिरत !, कोविदानां ईड्यः—स्तवनीयः स्फुरद्गुणगणो यस्य स तथा तदामन्त्रणम्। 'क्रमेलकः' उष्ट्रः 'द्विषां' वैरिणां 'ड्यं' जाड्यं तनुते । कस्मात् ? 'क्षणात्' क्षणमात्रेण गतिविलोकनात् । ङिः—गौरी तस्या अर्यः—स्वामी ड्यर्यः—शम्भुः, तस्य भक्तः तदामन्त्रणम् । किम्भूतः क्रमेलकः ? 'महातनुः' महाकायः ॥ ४७ ॥

ड्रदायकाऽनीतिमतां जनानां, ड्रमानवव्राजमतल्लिकस्य ।
ड्रनेत्र ! भूपेन्द्र ! तवावनीं स्राग्, ड्रमुख्य आक्रामति केलिकीर्णः ॥४८॥

टिप्पणी—हे भूपेन्द्र ! तव 'केलिकीर्णः' उष्ट्रः स्राग् अवनीं आक्रामति । किम्भूतः केलिकीर्णः ? 'ड्रमुख्यः' दूरगामिश्रेष्ठः । किम्भूत हे भूपेन्द्र ! ? अनीतिमतां जनानां 'ड्रदायक !' दण्डदातः ! । किम्भूतस्य तव ? 'ड्रमानवव्राजमतल्लिकस्य' दक्षमनुष्यनिकरश्रेष्ठस्य । ड्रं—कमलं तत्तुल्ये नेत्रे—लोचने यस्य स तथा तदामन्त्रणम् ॥ ४८ ॥

ड्वामण्डलीमण्डितवक्त्र उष्ट्रो, ड्वो दीप्यते भूप ! तवैष वृद्धः ।
ड्वाभाननाऽतुल्यशरीरदीप्तिड्वीशान-डिण्डीरविशुद्धकीर्ते ! ॥ ४९ ॥

टिप्पणी—हे भूप ! तव एष उष्ट्रः दीप्यते । किम्भूत उष्ट्रः ? ड्वामण्डल्या—दाढाश्रेण्या मण्डितं वक्त्रं यस्य स तथा । पुनः किम्भूत उष्ट्रः ? 'ड्वः' महोदरः । किम्भूत हे भूप ! ? ड्वः—चन्द्रः तदाभं—तत्सदृक्षं आननं यस्य स तथा तदामन्त्रणम् । किम्भूत उष्ट्रः ? 'अतुल्यशरीरदीप्तिः' अतुल्या—उच्चनीचा शरीरदीप्तिः—कायशोभा यस्य स तथा । किम्भूत हे भूप ! ? ड्वश्च—चन्द्रः ईशानश्च—ईश्वरः डिण्डीराश्च—फेनाः ड्वीशानडिण्डीराः, त इव विशुद्धा कीर्तिर्यस्य स तथा तदामन्त्रणम् ॥ ४९ ॥

ढ्याधीश ! धीश ! विदधातु तव प्रमोदं,
ढ्यायुक्त एष करभः शुभलक्षणाढ्यः ।
ढ्याभृद् गुहस्य इव दिव्यकलाकलापा-
ढ्यस्य प्रशस्यबहलश्रिय ईड्यमूर्त्तेः ॥ ५० ॥

टिप्पणी—'हे ढ्याधीश !' महीश ! 'हे धीश !' धीनाथ ! एषः 'करभः' उष्ट्रः तव प्रमोदं विदधातु । कस्य क इव ? 'गुहस्य' स्कन्दस्य, ढ्यां—गङ्गां बिभर्तीति 'ढ्याभृद्' महेशः स इव, यथा महेशः गुहस्य प्रमोदं करोति तथा । किम्भूतः करभः ? ढ्या—रमा बलसम्पदित्यर्थः, तया युक्तः । महेशपक्षे—ढ्या—विभूतिश्रीः तया युक्तः । पुनः किम्भूतः करभः ? शुभलक्षणाढ्यः, पक्षे श्रेयोलक्षणसमृद्धः । किम्भूतस्य तव ? दिव्यकलाकलापाढ्यस्य, गुहपक्षेऽप्येवमेव । पुनः किम्भूतस्य ? प्रशस्यबहलश्रियः, पक्षेऽप्येवमेव । पुनः किम्भूतस्य ? ईड्यमूर्तेः, पक्षेऽपीत्थमेव ॥ ५० ॥

ढ्वारिः पथं लङ्घयति क्षणेनाऽढ्रो लम्भजङ्घश्च सुदुर्गलङ्घी ।
ढ्राधीश ! भूमीश ! तवैष उष्ट्रो, ढ्रापद्विनिर्मुक्त ! समस्तशत्रुः ॥५१॥

टिप्पणी—हे भूमीश ! तव एष उष्ट्रः क्षणेन 'पथं' मार्गं लङ्घयति, पथशब्दोऽकारान्तोऽपि । किम्भूत उष्ट्रः ? ढ्राः—भ्रष्टा नष्टा इति यावद् अरयो यस्मात् स तथा । तथा ढ्रं—फल्गु अभव्यमित्यर्थः, न ढ्रो 'अढ्रः' भव्यः सुखकारीत्यर्थः । 'ढ्राधीश ! विदुराधीश !। 'ढ्रापद्विनिर्मुक्त !' मरणापद्रहित ! । 'समस्तशत्रुः' सम्यगुहृतरिपुः ॥५१॥

ढ्लिस्तुल्यलक्ष्मीर्बलवान् क्रमेलो, ढ्ला॑नाथ ! ते चित्तमुदं दधाति ।
ढ्लः केशवस्येव विशालभाल ! ढ्लह्लाद ! राजेन्द्र ! गिरीन्द्रधीर ! ॥ ५२ ॥

टिप्पणी—'हे ढ्लानाथ !' भूप ! 'क्रमेलः' उष्ट्रः 'ते' तव चित्तमुदं दधाति । कस्य क इव ? 'केशवस्य ढ्ल इव' यथा 'ढ्लः' गरुडः केशवस्य चित्तमुदं दधाति तथा । किम्भूत हे ढ्लानाथ ! ? ढ्लिः—देवेशः तस्य स्तुल्या लक्ष्मीर्यस्य स तथा तदामन्त्रणम् । [पुनः किम्भूत हे ढ्लानाथ ! ?] 'ढ्लह्लाद !' मधुरारव ! ॥ ५२ ॥

ढ्वाभसद्गुण ! गुडा-ऽऽज्यभोजनाद्, ढ्वोजहस्य बलमुष्ट्रकस्य ते ।
ढ्वाभपद् ! भवति भूपते ! महद्, ढ्वादनाद् विश इव प्रतिप्रगम् ॥५३॥

टिप्पणी—हे भूपते ! 'ते' तव उष्ट्रकस्य 'प्रतिप्रगं' प्रतिप्रभातं 'बलं' स्थाम महद् 'भवति' जायते । कस्मात् ? गुडा-ऽऽज्यभोजनात् । कस्य कस्मादिव ? 'विशः' मनुष्यस्य 'ढ्वादनादिव' दधिभोजनादिव, यथा मनुष्यस्य दधिभोजनाद् बलं महद् भवति तथा । किम्भूत हे भूपते ! ? ढ्वं—दुग्धं तदाभाः—तत्समाः सन्तो गुणा यस्य स तथा तदामन्त्रणम् । किम्भूतस्य उष्ट्रकस्य ? ढ्वः—व्यालः तस्य ओजं—बलं हिनस्तीति ढ्वोजहः, डप्रत्ययः, तस्य, ओजशब्दोऽकारान्तोऽपि । किम्भूत हे भूपते ! ? ढ्वः—कूर्मः तदाभौ पादौ यस्य स तथा, तदामन्त्रणं हे ढ्वाभपत् ! ॥ ५३ ॥

ण्यानाथगम्भीर ! नराधिपाग्रण्यर्च्याङ्घ्रियुग्मोष्ट्र उदाररावः ।
ण्यारञ्जितस्फारसभ ! प्रभाति, ण्यर्यार्क्यलक्ष्मी ! रिपुहृत्प्रभेदी ॥५४॥

टिप्पणी—ण्या—नदी तस्या नाथः—समुद्रः तद्वद् गम्भीरो यः स तथा तदामन्त्रणं हे ण्यानाथगम्भीर ! हे नृप ! उष्ट्रः प्रभाति । किम्भूत हे नृप ! ? नराधिपाग्रणीनां—भूपश्रेष्ठानाम् अर्च्यं—पूजनीयम् अंह्रियुग्मं यस्य स तथा तदामन्त्रणम् । किम्भूत उष्ट्रः ? 'उदाररावः' उत्कटशब्दः । ण्या—वाणी तया रञ्जिता स्फारसभा येन स तथा तदा-

---

१ आदर्शे तु **ढ्लाराट् ! तव स्वान्तमुदं दधाति** इति पाठभेदोऽपि दृश्यते । तथा **'ढ्लाराट् !'** **भूनाथ !** इति शब्दार्थोऽप्यादर्शे निर्दिष्टो वर्तते ॥

मन्त्रणम् । णीः—स्वर्गः तस्या अर्यः—स्वामी ण्यर्यः—इन्द्रः तस्य अक्र्या—स्तुल्या लक्ष्मीर्यस्य स तथा तदामन्त्रणम् । किम्भूत उष्ट्रः ? रिपुहृत्प्रभेदी ॥ ५४ ॥

ण्रापन्महीपाऽऽरटनेन दस्यून्, ण्राढ्यांश्च संज्ञापयतीति उष्ट्रः ।
ण्रौघप्रदेन प्रमदेन राज्ञाऽण्रेनौजसा भोः ! विजिता भवन्तः ॥ ५५ ॥

टिप्पणी—'ण्रापत् !' नष्टापत् ! हे महीप ! उष्ट्रः 'आरटनेन' शब्दविशेषेण दस्यून् इति संज्ञापयति । किम्भूतान् दस्यून् ? 'ण्राढ्यान्' लक्ष्म्याढ्यान् । इतीति किम् ? 'भोः !' दस्यवः ! भवन्तो विजिताः । केन ? राज्ञा । केन ? 'ओजसा' बलेन । किम्भूतेन राज्ञा ? 'ण्रौघप्रदेन' उत्सववृन्ददात्रा । पुनः किम्भूतेन ? 'प्रमदेन' वरहर्षेण गताहङ्कारेण वा । पुनः किम्भूतेन ? 'अण्रेन' अभीरुणा ॥ ५५ ॥

ण्वाभिभूतरतिनाथ ! मानवण्व ! द्विषां बलमलं बलाद्धर ।
ण्वायुतेति रटति त्वदुष्ट्रको, ण्वर्य ! भास्वरचमूसमन्वितः ॥ ५६ ॥

॥ उष्ट्रवर्णनम् ॥

टिप्पणी—'ण्वाभिभूतरतिनाथ !' रूपजितकन्दर्प ! । मानवानां—नृणां ण्वः—स्वामी यः स तथा तदामन्त्रणं 'हे मानवण्व !' हे राजन् ! त्वं द्विषां बलं 'अलम्' अत्यर्थं बलाद् हर, इति त्वदुष्ट्रको रटति । 'ण्वायुत !' प्रभासहित ! । 'ण्वर्य !' भूनाथ ! ॥ ५६ ॥

॥ इति प्रथमपरिच्छेदावचूर्णिः ॥ १ ॥

॥ इति श्रीखरतरगच्छीयश्रीज्ञानविमलोपाध्यायमिश्रशिष्य-
वाचनाचार्यश्रीवल्लभगणिकृते विद्वत्प्रबोधनाम्नि
शास्त्रे गजा-ऽश्व-वृष-सिंहोष्ट्रवर्णनो नाम
प्रथमः परिच्छेदः समाप्तः ॥

॥ द्वितीयः परिच्छेदः ॥

परिच्छेदे द्वितीयेऽथो शुकप्रभृतिपक्षिणाम् ।
वर्णनं क्रियते सम्यक् चरणद्वयधारिणाम् ॥ १ ॥

त्यापते ! तव विजोततेतरां, त्यार्चकप्रवर ! कीर एषकः ।
त्यार्चनोदितविभूतिसन्ततेऽन्त्येतरोत्तरसुनीलदीधितिः ॥ २ ॥

टिप्पणी—त्या—पृथ्वी तस्याः पतिः 'त्यापतिः' नृपः, तदामन्त्रणं हे त्यापते ! तव 'एषकः' एष कीरः 'विजोततेतराम्' अतिशयेन दीप्यते । किम्भूत हे त्यापते !? त्याः—गुरवः तेषामर्चकाः तेषु प्रवरः तदामन्त्रणम् । पुनः किम्भूत हे त्यापते !? त्यः—कृष्णः तस्य अर्चनेनोदिता विभूतिसन्ततिर्यस्य स तदामन्त्रणम् । पुनः किम्भूत हे त्यापते !? अन्त्याः—अधमाः तेभ्य इतरे अन्त्येतरे, तेषूत्तरो यः स तदामन्त्रणम् । किम्भूतः कीरः ? सुतरां नीला दीधितिर्यस्य स तथा ॥ २ ॥

त्रातवानशरणान् जनान् यकः, त्राणदस्य नृपतेश्च तस्य वै ।
त्रातनुः सुखयति प्रमोददः, त्रातरेष सवयः ! शुकोऽनकः ॥ ३ ॥

टिप्पणी—'हे सवयः !' मित्र ! 'तस्य' नृपतेः एष शुकः 'सुखयति' सुखं करोति । तस्य कस्य ? 'यकः' नृपोऽशरणान् जनान् 'त्रातवान्' रक्षितवान् । किम्भूतस्य तस्य ? त्राणदस्य । पुनः किम्भूतस्य तस्य ? 'त्रातनुः' कष्टाद् रक्षितनरस्य । किम्भूत हे सवयः !? 'त्रातः !' पालक ! । किम्भूतः शुकः ? प्रमोददः । पुनः किम्भूतः शुकः ? 'अनकः' दुःखरहितः ॥ ३ ॥

त्वेषते तव महीपते ! शुकः, त्वेष्टुमद्भुतमनोकहं परः ।
त्विट्पटुः पटुकटप्रमोददः, त्वष्टृसत्करततप्रतापभाक् ॥ ४ ॥

टिप्पणी—हे महीपते ! तव शुकः 'त्वेषते' शोभते । किम्भूतः शुकः ? अद्भुतं 'अनोकहं' वृक्षं 'त्वेष्टुं' शोभां कर्तुं 'परः' सावधानः । पुनः किम्भूतः शुकः ? त्विट्पटुः । किम्भूत हे महीपते !? पटूनां कटं—भृशं प्रमोदं ददाति तदामन्त्रणम् । पुनः किम्भूत हे महीपते !? त्वष्टृसत्करवत्—सूर्यकिरणवत् ततं प्रतापं भजते यः सः किपि तदामन्त्रणम् ॥४॥

थ्यर्य ! राजति शुकः सुखकारी, थ्यानिवेदनविशारदमुख्यः ।
थ्यो विशामिव वरो मददायी, थ्यर्कणीयकगभीरसुवर्णः ॥ ५ ॥

टिप्पणी—'हे थ्यर्य !' भूनाथ ! शुको राजति । किम्भूतः ? सुखकारी । क इव ? 'विशां' नृणां 'थ्य इव' स्वामीव, यथा नृस्वामी सुखकारी भवति तथा । किम्भूतः ? थ्या—कथा तस्या निवेदने विशारदाः तेषु मुख्यः, पक्षेऽप्येवमेव । पुनः किम्भूतः ?

वरः । पुनः किम्भूतः ? मददायी । पुनः किम्भूतः ? थीः—समुद्रः स इव अर्कणीयकः—गभीरसुवर्णो यस्य स तथा ॥ ५ ॥

श्रात्मा शुको रञ्जयति प्रधानं, श्रानाथ ! भूनाथ ! मनस्त्वदीयम् ।
श्रार्चाविधानोदितपापशुद्धे !, श्रा-ऽऽमोददाता विदुषां नराणाम् ॥६॥

टिप्पणी—हे भूनाथ ! शुकस्त्वदीयं मनो रञ्जयति । किंविशिष्टः शुकः ? श्रः—पवित्र आत्मा यस्य स तथा । किम्भूतं मनः ? प्रधानम् । किम्भूत हे भूनाथ ! ? श्रा—लक्ष्मीः राज्यसम्पत् तस्या नाथः तदामन्त्रणम् । पुनः किम्भूत हे भूनाथ ! ? श्राणां—तीर्थानाम् अर्चा—पूजा प्रस्तावाद् यात्रा तस्या विधानेन उदिता—आविर्भूता पापशुद्धिर्यस्य स तथा तदामन्त्रणम् । पुनः किम्भूतः शुकः ? श्रं—सुखम् आमोदश्च—हर्षः तयोर्दाता । केषाम् ? विदुषां नराणाम् ॥ ६ ॥

थ्विन्द्रधीर ! नरवीर ! पीवरः, थ्वाऽयुतो जयति तावकः शुकः ।
थ्वीश्वरः प्रवरनीलवर्णरुक्, थ्वाकथाकथनसावधानधीः ॥ ७ ॥

टिप्पणी—थुः—पर्वतः तन्मध्ये इन्द्र इव महत्त्वात् थ्विन्द्रः, तद्वद् धीरः तदामन्त्रणं हे थ्विन्द्रधीर ! हे नरवीर ! तावकः शुको जयति । किम्भूतः शुकः ? पीवरः । पुनः किम्भूतः ? थ्वेन—मैथुनेन न युतः—न सहितः थ्वाऽयुतः, अतिकामुकत्वाभावात् । पुनः किम्भूतः शुकः ? थूनां—साक्षिणां ईश्वर इव थ्वीश्वरः, तिर्यक्त्वेऽप्यतिनिपुणत्वात् । पुनः किम्भूतः शुकः ? प्रवरनीलवर्णा रुक्—कान्तिर्यस्य स तथा । पुनः किम्भूतः शुकः ? थ्वानां—स्त्रीणां कथाकथने सावधाना प्रधानत्वाद् धीर्यस्य स तथा ॥ ७ ॥

द्योतमानकलकौशलशाली, द्योततेऽतिचतुरस्तव कीरः ।
द्यामते ! नरपते ! सुमुदोको !, द्योपतिस्तुतयशस्सुयशःपते ! ॥ ८ ॥[1]

टिप्पणी—हे नरपते ! तव कीरः द्योतते । किम्भूतः कीरः ? द्योतमानं यत् कलं कौशलं तेन शालते इत्येवंशीलो यः स तथा । पुनः किम्भूतः कीरः ? अतिचतुरः । किम्भूत हे नरपते ! ? द्या—दया तत्र मतिर्यस्यासौ तथा तदामन्त्रणम् । पुनः किम्भूत० ? 'हे सुमुदोकः !' हर्षालय ! । द्योपतिः—इन्द्रः । 'हे सुयशःपते !' हे वरप्रतापपते ! ॥ ८ ॥

द्राणशौर्य-जयमञ्जुलश्रियो, द्रान्ति भूप ! तव दस्यवो भुवः ।
द्रव्यवन्निति निवेदयत्ययं, द्रष्ट्रिनो वरगिरा शुकोऽपशुक् ॥ ९ ॥

---

१ यद्यप्यत्र आदर्शे °यशस्सुयशःपते ! इत्येव पाठस्तदनुसारिणी च व्याख्या वरीवृत्यते, तथापि छन्दोभङ्गभावाद् वास्तवरूपेण °यशो ! यशःपते ! इत्यनेन पाठेन तद्व्याख्यया च भाव्यम् ।

टिप्पणी–अयं 'शुकः' कीर इति निवेदयति । कया ? वरगिरा । इतीति किम् ? हे भूप ! तव दस्यवो भुवः 'द्रान्ति' पलायन्ते । किम्भूताः सन्तः ? 'द्राणशौर्य-जयमञ्जुलश्रियः' पलायितप्राण-जयश्रेष्ठश्रियः । किम्भूत हे भूप ! ? द्रव्यवन् ! । किम्भूतः शुकः ? 'द्रष्ट्रिनः' द्रष्टृनाथः । पुनः किम्भूतः शुकः ? 'अपशुक्' गतशोकः ॥ ९ ॥

द्वारिकेव हरिणा त्वया पुरी, द्वेष-रोषरहिताऽसते सनत् ।
द्वन्द्वहीन ! सुमहीन ! निःस्पृहाऽद्विड् ! गिरेति निगृणाति कीरराट् ॥१०॥

टिप्पणी–'कीरराट्' शुकराजः 'गिरा' वाण्या इति 'निगृणाति' कथयति । [इतीति किम् ?] 'हे सुमहीन !' शोभनभूनाथ ! त्वया कृत्वा 'पुरी' नगरी 'सनत्' सदा 'असते' शोभते । केन केव ? 'हरिणा' कृष्णेन द्वारिका इव । कथम्भूता पुरी ? द्वेष-रोषरहिता, द्वारिकाऽपीदृगेव । किम्भूत हे सुमहीन ! ? 'द्वन्द्वहीन !' युद्धरहित !, निःस्पृह !, न द्वेष्टीति अद्विट् तदामन्त्रणम् ॥ १० ॥

ध्नेशजयोऽस्खलितांहतितोऽयं, ध्नाधिप ! भूपतिरापति कीर्त्तिम् ।
ध्नं विदधत् स्वकदेवचयस्य, ध्नाभयशा हि शुको वचतीति ॥ ११ ॥

टिप्पणी–'हि' निश्चितं शुक इति वचति । इतीति किम् ? ध्नानां–धनिनां अधिपः ध्नाधिपः तदामन्त्रणं हे ध्नाधिप ! । 'अयं' प्रत्यक्षः भूपतिः कीर्तिं 'आपति' प्राप्नोति । कुतः ? अस्खलितांहतितः । किम्भूतो भूपतिः ? 'ध्नेशजयः' ध्नं–धनं तस्य ईशः ध्नेशः, तं जयतीति ध्नेशजयः । किं कुर्वन् ? स्वकदेवचयस्य 'ध्नं' साधनं 'विदधत्' कुर्वन् । किम्भूतः शुकः ? ध्नः– ईशः तदाभं यशो यस्य स तथा ॥ ११ ॥

ध्यायतीत्ययकमर्क्यरुक् शुको, ध्यानधीर्जयतु भूपराडसौ ।
ध्याढ्य ! नीतिपरिरञ्जितप्रजो, ध्यातदेव-गुरुनामको यतः ॥ १२ ॥

टिप्पणी–'हे ध्याढ्य !' प्रज्ञाढ्य विद्वन् ! 'अयकम्' अयं शुक इति ध्यायति । इतीति किम् ? असौ भूपराड् जयतु । तत्र हेतुमाह–यतः कारणाद् नीतिपरिरञ्जितप्रजः ध्यातदेव-गुरुनामकश्च । किम्भूतः शुकः ? 'अकर्यरुक्' स्तवनीयकान्तिः । किम्भूतः भूपराड् ? ध्यानधीः ॥ १२ ॥

ध्रायत्यपायैर्विधुरस्त्वदीयो, ध्रातातिचित्तस्तव सौम्यदृष्ट्या ।
ध्राणातिचेतांसि महांसि कुर्वन्, ध्रानाथसार्थस्य महीप ! कीरः ॥१३॥

टिप्पणी–हे महीप ! त्वदीयः कीरः 'ध्रायति' तृप्तिं प्राप्नोति । 'अपायैः' कष्टैः 'विधुरः' रहितः । कया ध्रायति ? तव सौम्यदृष्ट्या । पुनः किम्भूतः कीरः ? ध्रातं–तृप्तं

अतिशयेन चित्तं यस्य स तथा। किं कुर्वन्? 'ध्रानाथसार्थस्य' राजवृन्दस्य 'महांसि' उत्सवान् कुर्वन्। किम्भूतानि? ध्राणं-तृप्तिं प्राप्तं अतिशयेन चेतो येभ्यस्तानि तथा तानि ॥ १३ ॥

ध्वस्त्वाऽरिसैन्यं विजयी जयत्ययं, ध्वस्ताऽप्रशस्तो नृपतिर्मदीयः।
ध्वानं करोति प्रमना इतीमं, ध्वाङ्क्षः सुखानामसकौ शुकोऽग्रः ॥१४॥

टिप्पणी—असकौ शुकः इति इमं ध्वानं करोति। इतीति किम्? अयं मदीयो नृपतिर्विजयी सन् जयति। किं कृत्वा? अरिसैन्यं ध्वस्त्वा। किम्भूतो नृपतिः? ध्वस्ताऽप्रशस्तः। किम्भूतः शुकः? प्रमनाः। पुनः किम्भूतः शुकः? सुखानां 'ध्वाङ्क्षः' याचकः। पुनः किम्भूतः? अग्रः ॥ १४ ॥

न्यग्भावमाप्तं वदनं रिपूणां, न्युज्झत्प्रतापं सवितेव साये।
न्यायैकमाणिक्यनिधे! तवेश!, न्यस्यन्नशस्तं वदतीति कीरः ॥ १५ ॥

॥ शुकवर्णनम् ॥

टिप्पणी—हे न्यायैकमाणिक्यनिधे! हे ईश! तव रिपूणां वदनं 'न्यग्भावं' नीचैस्त्वं 'आप्तं' प्राप्तम्, इति कीरो वदति। किं कुर्वन्? 'अशस्तं' अमङ्गलं 'न्यस्यन्' निक्षिपन्। किम्भूतं वदनम्? 'न्युज्झत्प्रतापम्' त्यजत्प्रतापम्। कस्मिन् क इव? 'साये' सन्ध्यायां 'सविता इव' सूर्य इव, यथा साये सूर्यो न्युज्झत्प्रतापो भवति तथेदमपीति ॥१५॥

॥ शुकवर्णनम् ॥

न्रेश्वर! स्फुरति सद्यशस्त्विति, न्रावलीति निगृणाति सुन्दरम्।
न्राऽमुना जयिजिघांसवो हता, न्रोत्तमा वदति तित्तिरिस्त्विदम् ॥१६॥

टिप्पणी—'हे न्रेश्वर!' नृप! न्रावली इति सुन्दरं निगृणाति। इतीति किम्? तित्तिरिरिदं 'वदति' शब्दायते। तदेवाह—अमुना 'न्रा' नृपलक्षणेन पुंसा जयिजिघांसवो हताः, इति सद्यशः स्फुरति। किम्भूता जयिजिघांसवः? 'न्रोत्तमाः' मनुष्योत्तमाः। तुशब्दौ पादपूरणार्थौ ॥ १६ ॥

न्वाभाभिभूतस्मररूप! भूपते!, न्वां चञ्चुरां वाचमसौ समुच्चरन्।
न्वग्रो जयस्तित्तिरिराहवे तव, न्वालीवियुक्तो वचतीति भावी ॥१७॥

टिप्पणी—हे भूपते! असौ तित्तिरिरिति वचति। इतीति किम्? 'आहवे' सङ्ग्रामे तव जयो 'भावी' भविता। तित्तिरिः किं कुर्वन्? 'न्वां' नव्यां 'चञ्चुरां' सुन्दरां वाचं समुच्चरन्। किम्भूत हे भूपते!? न्वा—नवा या आभा—शोभा तया अभिभूतं स्मररूपं येन स तथा तदामन्त्रणम्। किम्भूतो जयः? 'न्वग्रः' स्तुतिश्रेष्ठः। किम्भूतः तित्तिरिः?

'न्वालीवियुक्तः' पातकालीरहितः "नूशब्दः पातके पुंसि" [विश्वशम्भुएका० ७९] इत्युक्तेः ॥ १७ ॥

प्याढ्यगभीर ! सुतित्तिरिरेष, प्याधिषणाऽतनुराज्यश्रीति ।
प्यात्मगुण ! क्षितिपैतु सुवृद्धिं, प्यग्र ! सुवाक् शुभभाग् महिमाढ्यः॥१८॥

टिप्पणी—हे क्षितिप ! एष सुतित्तिरिः इति अवति—वक्ति—कथयतीत्यध्याहार्यम् । इतीति किम् ? अतनुराज्यश्रीः सुवृद्धिं 'एतु' प्राप्नोतु । किम्भूत हे क्षितिप ! ? प्यः—पयः तेनाढ्यः प्याढ्यः—समुद्रः, तद्वद् गभीरः [तदामन्त्रणम्] । 'प्याधिषण !' कृपा-बुद्धे ! । पयः—पवित्रा आत्मगुणा यस्य स तथा तदामन्त्रणम् । 'प्यग्र !' लक्ष्मीश्रेष्ठ ! । किम्भूतः तित्तिरिः ? सुवाक् शुभभाग् महिमाढ्यः, शकुनेषु प्रतीतत्वात् ॥ १८ ॥

प्रष्ठतित्तिरिरयं पुनः पुनः, प्राक्कपिञ्जल इति स्वकाभिधाम् ।
प्रीतिदाय्यनुकरोति यो वदन्, प्राति सोऽभिमतमर्थमीश्वर ! ॥ १९ ॥

प्लक्षो यथा नियतदुस्सहरक्तपित्त-
प्लोषाय मानवचयस्य रुजाजितस्य ।
प्लुष्टामयः खलु तथा खरकोणपक्षी,
प्लुष्णन् जनान् भवतु सन्ततसम्मदाय ॥ २० ॥

॥ तित्तिरिवर्णनम् ॥

[1]प्वो यथा झटिति हन्ति निस्तुषां, [2]प्वां तथा दुरितसन्ततिं नृणाम् ।
[3]प्वात्मभूप ! तव राजहंसकः, [4]प्वाः प्रपालक ! शरीरलोकनात् ॥ २१ ॥

टिप्पणी—१ वायुः । २ धूलिम् । ३ हे पुण्यात्मराजन् ! । ४ भुवः ॥ २१ ॥

[1]फ्यश्वेतशम्भुसमनिर्मलदेहदीप्तिः,
[2]फ्याऽयुक्त एष विदधाति मुदं मरालः ।
[3]फ्यालीढतुल्यरमणीयगभीरताग्रः,
[4]फ्याऽतङ्कदोषरहित ! क्षितिप ! त्वदीयः ॥ २२ ॥

टिप्पणी—१ फेन । २ रजरहितः । ३ पयःश्रेणीद्धः, समुद्र इत्यर्थः । ४ मरण ॥ २२ ॥

[1]फ्राकर्णनाद् यस्य भवन्ति सिद्धयः,
[2]फ्राऽऽरिष्टकोटिः स्फुट[3]त्वेकटो[4]ऽर्कद्ः ।

[5]फ्रैंदातरुर्वीश्वर ! [6]सैत्सितच्छदः,

[7]फ्रौंऽमुद् भृशं भाति सकः सनत् तव ॥ २३ ॥

टिप्पणी– १ शब्दश्रवणात् । २ स्फेटित । ३ जाततारुण्यः । ४ अमत्सरी । ५ लक्ष्मीदातः ! । ६ राजहंसः । ७ ध्वस्ताऽहर्षः ॥ २३ ॥

[1]फ्लूंमिव हन्त्वरिवृन्दममङ्गलं, [2]फ्लूंविशदद्युतिरेष मरालराट् ।
[3]फ्लूंकलहंसकुलस्य विभूषकः, [4]फ्लूंकलभाजितचन्द्र ! महीपते ! ॥ २४ ॥

टिप्पणी– १ वाणपूरम् । २ वपुः । ३ समस्त । ४ वदन ॥ २४ ॥

[1]फ्वेंुपम ! भूप ! विभात्यतिभासुरः, [2]फ्वेंवनकृत् तव दिव्यसितच्छदः ।
[3]फ्वेंवसितौ सुविचक्षण ! सक्षणः, [4]फ्विँतरराडभिधानसुखप्रदः ॥ २५ ॥

टिप्पणी–१ इन्द्रोपम ! । २ हे शरणागतत्राणकारिन् ! । ३ मन्त्रावसाने । ४ सफलजल्पनेन राजते ॥ २५ ॥

॥ हंसवर्णनम् ॥

[1]ब्यैंयुक्त ! वक्ति क्षितिपाऽसकौ बको,

[2]ब्यैंदीधिते ! वामपदास्थितः सन् ।

[3]ब्यैंलार्थपत्नीविषयाप्तिमीप्सितां,

[4]ब्यैंनुत्तमः पापविपाकनाशकृत् ! ॥ २६ ॥

टिप्पणी–१ हे सुखयुक्त ! । २ सूर्य । ३ हे पूजनश्रेष्ठ ! । ४ कान्तिश्रेष्ठः ॥ २६ ॥

[1]ब्रैं-षोडशार्चिःस्तवनीय ! सन्मते !,

[2]ब्रैंयुक् ! चतस्रः ककुभो विलोकयन् ।

[3]ब्रैंभा ! बकस्त्रस्त ऋधग् ब्रवीत्यरं,

[4]ब्रैंचोरभीतिं नृपते ! सुखच्छिदम् ॥ २७ ॥

टिप्पणी–१बृहस्पति शुक्र । २ हे बलयुक् ! । ३ ब्रह्मदीप्त ! । ४ बहुल० ॥ २७ ॥

[1]ब्लैंतुल्यतेजो ! वसुधां च पान्थकं,

[2]ब्लैंयुग् बकः पश्यति यः पुनः पुनः ।

[3]ऽलकोपटोप ! क्षितिपाल ! विघ्नकान्,
[4]ऽलरूप ! सर्वानुपहन्ति स क्षणात् ॥ २८ ॥

टिप्पणी—१ हे अग्निसमतेजः !। २ बलयुक्। ३ यम। ४ कामरूप ! ॥ २८ ॥

[1]ऽवबुद्धिजिद्धीः ! स्ववपुर्निरूपयन्,
[2]ऽत्रभक्त ! सम्यग् महिलाप्तये भवेत्।
[3]ऽवमानकोर्वीश ! बको विसंशयो,
[4]ऽवया प्रदत्तेन्दिरवित्तसद्यशः ॥ २९ ॥

टिप्पणी—१ गीष्पति। २ ब्रह्मा। ३ कृष्णवाक्यमानक !। ४ अस्वया ॥ २९ ॥

॥ बकवर्णनम् ॥

[1]ऽयक्षित् ! समृद्ध्यै वरकोकयुग्मं, [2]ऽयैस् शस्त्रधारिन् ! रव-वीक्षणाभ्याम्।
[3]ऽषानुज्ञ ! विज्ञेश ! सिमास्पदेषु, [4]ऽयुद्धं मुदर्द्धं वदतीति विद्वान् ॥३०॥

टिप्पणी—१ भयहृत् !। २ भयकारि। ३ रौद्राज्ञ !। ४ भीहरम् ॥ ३० ॥

भ्रष्टकष्टशकुनज्ञजना इति, भ्रान्तिहारिण ऋतं निगृणन्त्यरम्।
[1]ऽाःप्रताप ! सविषाददुरारवं, [2]ऽाग् रथाङ्गयुगलं विपदे भवेत् ॥ ३१ ॥

टिप्पणी—१ दीप्तप्रताप !। २ दीप्तम् ॥ ३१ ॥

ऽलासते नरपतेऽतिमनोहरं, [1]ऽलासथूद्धतरथाङ्गयुगं तव।
ऽलासमानतनुकं हृदयावनं, [2]ऽलागभस्तिकृतहृत्प्रमदोदयम् ॥ ३२ ॥

टिप्पणी—१ दीप्तिः, प्रताप इति यावत्। २ दीप्त ॥ ३२ ॥

॥ चक्रवाकवर्णनम् ॥

[1]ऽवानाथसेवाविधिसावधान !, [2]ऽवीशोल्लसत्सारसयुग्मदर्शः।
[3]ऽवानन्ददायी भवतीष्टसौख्य-ऽवैश्वर्यभोक्तः ! पथि गच्छतो नुः ॥३३॥

टिप्पणी—१ गौरीनाथ। २ हे भूनाथ !। ३ धन ॥ ३३ ॥

[1]ऽयावर्णिनीलाभविधायकं भवेन्[2]ऽयायुक्तवामं यदि सारसद्वयम्।
[3]ऽयाऽर्हारिराजीहर ! भूप ! सारवं, [4]ऽया-ऽश्वेभमुख्याधिपते ! महौजः॥३४॥

टिप्पणी—१ रमा। २ क्षमा। ३ हिंसा। ४ उग्र ॥ ३४ ॥

[१]म्रस्तुत्यकीर्ते ! नृप ! सारसद्वयं, [२]म्रेणायुतैकं सुकृता[३]रवं वरम् ।
[४]म्रक्षेण हीनं किल पार्श्वया[५]मले, [६]म्रभ्रष्ट ! वक्त्युत्तमकन्यकापनम् ॥३५॥

टिप्पणी—१ देव । २ हे मैथुनरहित ! । ३ हसत् । ४ रोषेण । ५ द्वये । ६ मृत्युरहित ! ॥ ३५ ॥

म्लानाङ्गभासां मनुजाधिनाथ !, म्लानिं गता वक्ररमा रिपूणाम् ।
म्लेयादथाशेषविपच्चयश्चाऽम्लानेति ते वक्ति [१]सरोजयुग्मम् ॥ ३६ ॥

टिप्पणी—१ सारस ॥ ३६ ॥

॥ सारसवर्णनम् ॥

[१]क्ष्मापतेऽध्वनि विशां हि गच्छतां, [२]क्ष्मावस्थितस्य खलु [३]वामनिस्वनः ।
[४]क्ष्माय टिट्टिभपतत्रिणोऽ[५]गंसे, [६]क्ष्मा-ऽऽमयादिरहितेश्वरश्रियः ॥ ३७ ॥

टिप्पणी—१ धरापते ! । २ वृक्ष । ३ वामशब्दः । ४ उत्तमाय । ५ क्षेमाय । ६ बन्धन ॥ ३७ ॥

ख्यालीकृतस्तोत्रपवित्रचेतोऽख्योर्वीपते ! वै टिटिटीति दीप्तम् ।
ख्याक्षेट्ट टिटीति प्रवरं च शान्तं, ख्योऽस्याऽऽरवद्वन्द्वमुदाहरन्ति ॥३८॥

[१]यूाधिनाथविधिपूजनकर्त्री, [२]यूाऽयुतोत्तमतनुर्विबुधाली ।
[३]यूिव्रजप्रथितमुद् वदतीति, [४]यूप्रभ ! क्षितिप ! टिट्टिभवर्णम् ॥ ३९ ॥

टिप्पणी—१ यादवपति । २ जरा । ३ स्त्री । ४ जायमान ॥ ३९ ॥

॥ टिट्टिभवर्णनम् ॥

[१]ख्वस्थितिस्थिरमनः ! शृणु वर्णान्, [२]ख्वाकृतप्रमद ! मोररवस्य ।
[३]ख्वप्रधान ! निनदे प्रथमेऽरि[४]ख्वप्रकृद् ! द्रविणलाभ ऋधक् स्यात् ॥४०॥

टिप्पणी—१ यज्ञकरणलक्षणा । २ स्त्री । ३ जगत् । ४ मर्दनकारिन् ! ॥ ४० ॥

[१]ल्योल्लसद्गुणगणप्रमणीनां, [२]ल्यारिहार ! लभते सुकलत्रम् ।
[३]ल्यालिबान्धवयशोऽ[४]परावे, [५]ल्यंग्रबर्हिण इलाप्रतिपाल ! ॥ ४१ ॥

टिप्पणी—१ निलय । २ उद्धृत । ३ नलिन्यालि । ४ द्वितीय । ५ शब्दाग्र ॥ ४१ ॥

[1]लूस्थिताम्बुदविलोकनहर्षाऽऽलूावरञ्जितजनस्य तृतीये ।
[2]लूप्रमोदद ! शिखण्डिन ऋद्धयऽऽलूोचिरारव इलापतिभीतिः ॥ ४२ ॥

टिप्पणी–१ ख । २ ललनानन ॥ ४२ ॥

[1]ह्लानाथतुग्वाहनकस्य रङ्गह्लष्टाचलानायक ! चोरभीत्यै ।
[2]ह्लाऽऽह्लाददातुः शिखिनः क्षणात् स्याल्लक्ष्मप्रतिज्ञेन्द्रतुरीयरावः ॥ ४३ ॥

टिप्पणी–१ गौरी । २ लोक ॥ ४३ ॥

[1]ल्वतातनामस्मृतिकान्तचेता, [2]ल्विनाहिभुक् पञ्चमनिस्वनः स्यात् ।
[3]ल्वभीतये चान्यजनाज्जनानां, [4]ल्वपूजकानेकजनप्रमोदिन् ! ॥ ४४ ॥

टिप्पणी–१ लव । २ हे भूनाथ ! । ३ सूदन । ४ रुद्रकृष्ण ॥ ४४ ॥

व्यपोहतीलाप्रतिपाल ! दुष्टां, व्यथां च सत्कर्म करोति शीघ्रम् ।
व्ययेन हीनस्य खश्च षष्ठो, व्युपाधिराट् सर्पभुजो [1]व्रिराजः ॥ ४५ ॥

टिप्पणी–१ पक्षिराजस्य ॥ ४५ ॥

व्रतीश्वराः शास्त्रविदो वदन्ति, व्रतावना मोररवस्य वर्णान् ।
व्रजद्गुजैतादृशकान् महीप !, व्रजोत्तमाङ्गप्रवरावतंस ! ॥ ४६ ॥

श्यत्याशु दुःखं मनसो जनानां, [1]श्याख्यां प्रभाते कथयन् मयूरः ।
श्यामादिवर्णैः शुभपिच्छदीप्तिः, श्यग्रो महीपाल ! सुनीलकण्ठः ॥४७॥

टिप्पणी–१ आशीर्वचः ॥ ४७ ॥

॥ मयूरवर्णनम् ॥

[1]श्रानाथडिण्डीरहिमांशुवर्ण !, श्रश्रेष्ठ ! चाषः पथि गच्छतो नुः ।
[2]श्रामङ्गलेभ्यः खलु दक्षिणः श्याश्रय्यग्र ! भूपाल ! कलानिधान ! ॥४८॥

टिप्पणी–१ गौरी । २ रमा ॥ ४८ ॥

श्लोकशौक्ल्यविजिताऽमृतप्रसूः, श्लाघनीयकिकिदीविमर्क्यभम् ।
श्लाघयन्ति विबुधाः प्रबोधयः, श्लाघ्यपक्षिनिकरेषु सुन्दरम् ॥ ४९ ॥

[1]श्वस्वस्तिकान्तर्गमनेन चाषकोऽश्वौ[2]पात्तभक्षः करति प्रदक्षिणाम् ।
[3]श्वश्रीप्रदाऽभीष्टसुखार्थलब्धयेऽ[4]श्वोर्वीपते ! स्याद्धि यदा तदा मुदा ॥५०॥

टिप्पणी–१ [illegible] । २ [illegible] । ३ [illegible] । ४ अमैथुन ॥ ५० ॥

[1]ष्यौघार्घिताङ्घ्रे ! यदि दक्षिणेन, [2]ष्याऽऽभात्म यान्तं किकिदीविमग्र्यम् ।
[3]ष्यानन्द ! काकश्च जयेत्तदा स्यात्, [4]ष्यग्राग्रणीः पान्थपराजयाय ॥५१॥

टिप्पणी—१ प्रेष्य । २ शङ्खाभात्म । ३ पुत्रानानन्दयतीति । ४ मुख्यग्राग्रणीः ५१

[1]षृः स्तौति वाचेति मुदा प्रवक्ति, [2]षृेन्दत्प्रतापं नृपतिं विलोक्य ।
[3]षृाऽस्पृग् ! भवन्तं पथि चाष एष, [4]षृोद्दामगाम्भीर्ययुजं व्रजन्तम् ॥५२॥

टिप्पणी—१ इन्द्रः । २ सूर्य । ३ कष्टास्पृग् । ४ अर्णव ॥ ५२ ॥

[1]ष्टृाऽरिष्ट ! शिष्ट ! प्रतिशिष्टदौष्ट्या[2]ऽष्टृाऽर्च्याऽथ चाषो जयति प्रकाकम् ।
[3]ष्टृाद्यैः सुधीभिर्विजयो विदेशे, [4]ष्टृाद्यासनानां कथितोऽध्वगानाम् ॥५३॥

टिप्पणी—१ भ्रष्ट । २ अव्रात्य । ३ विप्रा० । ४ शकटाद्या० ॥ ५३ ॥

[1]ष्टिदार्ढ्य ! शस्त्राहतवैरिवार !, [2]ष्टुदोषरोषेश्वर ! चाषकस्य ।
[3]ष्टुदानबुद्धे ! रुतमीक्षणं च, ष्टु चोपदिष्टं सकलास्पदेषु ॥ ५४ ॥

टिप्पणी—१ यष्टि । २ भ्रष्ट । ३ शरण ॥ ५४ ॥

[1]ष्ठोऽरण्यमध्ये व्रजतः पुर[2]श्चेत् , [3]ष्ठं चाषको यो विदधाति दीप्तम् ।
[4]ष्ठाऽऽभाजिताब्जेट् ! कलहावहः [5]सें, [6]ष्ठाः पण्डिता इत्थमुदाहरन्ति ॥५५॥

टिप्पणी—१ श्रेष्ठः । २ यदि । ३ शब्दम् । ४ वदना० । ५ चाषः । ६ मुखराः ॥ ५५ ॥

स्कन्ताऽऽपदां क्र क्र इति प्रदीप्तः, स्कन्नापदर्केऽर्क इति प्रशान्तः ।
स्कन्धस्थिरोर्वीश ! किकीदिवेश्च, स्कन्दा इति ध्वानयुगं वदन्ति ॥५६॥

॥ चाषवर्णनम् ॥

स्खलितदुष्कृत ! खञ्जनकं बुधाः, स्खलदलीक ! वदन्ति अमूदृशम् ।
स्खलनहीनकयोगयुतं सदाऽस्खलितधीर्मुनिसूनुमिलापते ! ॥ ५७ ॥

स्[1]तुत्योदितेऽगस्त्यमुनौ सुदेशेऽस्ति[2]मंश्च दृष्ट्वा वरखञ्जरीटम् ।
स्तब्धार ! कुर्याद् वरमन्त्रपूजास्तत्सूचिताभीष्टफलस्य सिद्धयै ॥ ५८ ॥

टिप्पणी—१ हे । २ हे ॥ ५८ ॥

स्थान ! श्रियां यः कुवपुः कुचेष्टः, स्थास्नो कुदेशे हि निरीक्ष्यतेऽह्नि ।
स्थायिन् ! रणे खञ्जनकः कदाचित्, स्थाण्वर्च ! दृष्ट्वा परिशोषयेत्तम् ॥५९॥

स्थान ! श्रीसुखपेटकस्य कुवपुः सत्खञ्जरीटः खगः,
स्थास्नो भूप ! कुचेष्टितः खलु कुदेशे दृश्यते जातु यः ।
स्थाण्वर्चाविधितत्परामलमते ! दृष्ट्वा विशेषाद् ऋधक्,
स्थायिँस्तं परिशोषयेत् तदुदिताऽसौख्यव्रजध्वस्तये ॥ ६० ॥

॥ खञ्जरीटवर्णनम् ॥

इति श्रीखरतरगच्छीयश्रीजयसागरमहोपाध्यायसन्तानीय-
श्रीज्ञानविमलोपाध्यायमिश्रशिष्यवाचनाचार्य-
श्रीवल्लभगणिकृते विद्वत्प्रबोधनाम्नि शास्त्रे
शुकादि-खञ्जरीटान्तचरणद्वयधारि-
पक्षिवर्णनो नाम द्वितीयः
परिच्छेदः ॥ २ ॥

॥ तृतीयः परिच्छेदः ॥

परिच्छेदे तृतीयेऽथ यत्यादिजनवर्णनम् ।
क्रियते बुधलोकानां कुतुकानन्दहेतवे ॥ १ ॥

स्नेहो गेहे च गेहिन्यमितधनचये नास्ति येषां कदापि,
स्नेहिन्नुर्वीश ! शश्वद्रुचिरचरितसत्पालनप्रह्वचित्ताः ।
स्विद्यन्तस्ते तपस्सु प्रवरमुनिजनाः साधयन्तीष्टमार्गं,
स्नानश्वेताङ्गदीप्ते नृपजनजनितानन्दभन्दा अमन्दाः ॥ २ ॥

स्पन्दं कुर्वन्त्य उर्व्यां प्रचुरवरनरोदारसारप्रबोधं,
स्पष्टं यच्छन्त्य इष्टं रविरुचय इवाम्भोजवृन्दप्रबोधम् ।
स्पर्शेनाऽऽनन्ददायिच्छ्रमणजनघटा भान्ति दुर्भ्रान्तिमुक्ताः,
स्पष्टा द्रुष्टेष्टचित्तप्रमदविधिपरज्ञानलक्ष्मीशरीराः ॥ ३ ॥

स्फूर्जत्तेजस्विभास्वन्नविरतमतनुश्रेयसां दायकास्ते,
स्फूर्त्तानन्दाः प्रमोदं विदधतु भवतां साधुलोकाः सुलोकाः ।
स्फूर्जन्ति प्राज्ञवर्ण्याः प्रगुणगुणगणा भूतले भूप ! येषां,
स्फूर्त्त्या चारित्रलक्ष्म्याः प्रविदितयशसः सेवनीया जनानाम् ॥४॥

स्मरन्त इन्दन्त इमे मुनीन्द्राः, स्मार्यां शुभां पञ्चनमस्कृतिं ते ।
स्मयन्त ईशानसुतारमुख्यान् , स्मेराब्जचक्षुः स्वगुणैर्जयन्ति ॥ ५ ॥

॥ साधुवर्णनम् ॥

स्यमीकदातार इव ध्वनन्तः, स्यदेन वादावसरे प्रबुद्धाः ।
स्यान्तार्थसार्थास्तव भान्त्यनेके, स्यमन्त उद्दामसुतर्कशास्त्रम् ॥ ६ ॥

स्त्यायन्तोऽस्ति च नास्ति वस्त्विदमिति प्रत्यक्षमानादिषट्-
स्त्यानोद्दामलसत्प्रमाणकथनप्रह्वाः प्रबुद्धा अमी ।
स्त्यातारो विविधप्रधर्मसुविधेर्धात्रीधवौघाग्रणीः,
स्त्यायन्ति प्रमदोदयादतनुसत्तर्कप्रयुक्तीर्हठात् ॥ ७ ॥

स्रष्टेव सृष्टिं विदधाति दिव्यां, स्राक् शास्त्रराजीं मतिमत्समूहः ।
स्रक्शोभमानाङ्गरुचिर्वचस्वी, स्रस्ताऽतनुस्वीयदुरन्तदुःखः ॥ ८ ॥

[1]स्लश्लाघ्या अघसङ्घसंहतिकृतः शास्त्रेषु लीना भृशं,
[2]स्लः पद्मेष्विव भूपते ! तव पुरे राजन्त्यरं पण्डिताः ।
[3]स्लावल्यर्चितपत्प्रहर्षुलसुराचार्योशनोजिष्णवो-
ऽ[4]स्लाऽमौढ्याढ्यविरूढविश्वमहिमाः संरूढराढावृढाः ॥ ९ ॥

टिप्पणी—१ नर । २ भ्रमरः । ३ अमरालि । ४ सुखि ॥ ९ ॥

स्वीयस्वीयसुदर्शनेष्वविरतं चञ्चत्प्रतिज्ञाभृतः,
स्वच्छातुच्छगुणावसाननिपुणप्रज्ञा गुणिज्ञानिनः ।
स्वर्वास्याश्रयसन्निभे तव महीनाथाग्रणीः ! पत्तने,
स्वाढ्यादूढ्यजनप्रियाः शुभचया बौद्धादयो भान्त्यरम् ॥ १० ॥

॥ पण्डितवर्णनम् ॥

ह्लोतार आस्कन्दनशुष्मणा स्राक्, ह्लोतव्यदैत्यप्रततेः सुशूराः ।
ह्लव्यं वचो नैव निवेदयन्तो, ह्लुत्युन्मनस्त्वां नृप! रञ्जयन्ति ॥ ११ ॥

[1]ह्यङ्कप्रभास्पर्द्धियशोनिधाना, ह्यो[2]घार्थितेशार्चनसावधानाः ।
[3]ह्याह्लाददातार उदारसाराऽ[4]ह्यालीपते ! भूप ! विभान्ति वीराः ॥ १२ ॥

टिप्पणी—१ मृगाङ्कः । २ नरौघ । ३ हर्षवदाह्लाददाः । ४ दुर्ग ॥ १२ ॥

ह्रीणाः सन्तो वनान्तः सतत[—]वसतिं यत्सुशौर्याभिभूत्या,
ह्रीमन्तश्चक्रिरेऽरं प्रचुरतरतरःसंयुता एणराजाः ।
[1]ह्रौघस्तम्बेरमोक्षव्रजन ! जययुतास्ते त्वदीया महीश !,
[2]ह्रोऽब्रह्माऽनीतिकार्युद्धतमदमथना एत आभान्ति वीराः ॥१३॥

टिप्पणी—१ हंस । २ चौर्यम् ॥ १३ ॥

[1]ह्लादन्ते नृपते ! भवन्तमनिशं दुर्दान्तवीरास्तव,
ह्लत्त्रिव्रातयुता अकान्तसमिति स्तोतव्यसत्कीर्त्तयः ।
[2]ह्लन्नाऽ[3]ऽमिन्नमनोजनस्तुतलसद्गाम्भीर्यशौर्यादिकान्,
[4]ह्लादन्ते प्रगुणान् गुणान् गुणविदो येषां मुदा बन्दिनः ॥ १४ ॥

टिप्पणी—१ सुखं कुर्वन्ति । २ सुखित । ३ समन्तात् [illegible] । ४ कथयन्ति ॥१४॥

[1]ह्वयन्ति वीरा इति यात कुत्र भो !,
[2]ह्वयन्त ऋद्धानहितान् मिथो युधि ।
[3]ह्वयाऽन्यया सार्द्धमसङ्गकारिणो,
[4]ह्ववैरिवारप्रहृतौ महीपते ! ॥ १५ ॥

टिप्पणी—१ कथयन्ति । २ स्पर्धमाना । ३ स्त्रिया । ४ प्रह्व ॥ १५ ॥

[1]क्ष्णुतोत्तमास्त्राभ्यसना बलान्यमी,
[2]क्ष्णुदुत्तमाः क्ष्माप ! तवोल्लसद्भटाः ।
[3]क्ष्णवप्रकर्मप्रवणा नरा इव,
[4]क्ष्णुवन्ति शस्त्राणि हि दीपयन्त्यरम् ॥ १६ ॥

टिप्पणी—१ तेजित । २ निशानक्षुद्वराः । ३ निशान । ४ तेजयन्ति ॥ १६ ॥

क्ष्मापाल ! वीरास्तव चङ्गभोगान्,
क्ष्मायां प्रभुञ्जन्ति गतापवादाः ।
क्ष्माधृत्समानाः सुकुले कुलीनाः,
क्ष्मावर्णिनीभालसुवर्णकाभाः ॥ १७ ॥

[1]क्ष्यानाथ ! युष्मत्पदपद्मसेवां,
[2]क्ष्यग्राङ्ग ! कुर्वन्ति भटाः पटिष्ठाः ।
[3]क्ष्यश्वेतचित्तेन दृढप्रतिज्ञाः,
[4]क्ष्या-ऽऽदित्यदुःसह्यतपत्प्रतापाः ॥ १८ ॥

टिप्पणी—१ भू । भूप ! । २ ज्योतिरग्राङ्ग ! । ३ क्षारोज्वल । ४ अग्नि ॥१८॥

[1]क्ष्रं विद्विषां द्वेषजुषां नृपाणां,
[2]क्ष्राज्ञाप्रतिज्ञेश्वर ! कुर्वतेऽमी ।
[3]क्ष्राढ्या भटा नष्टनिघृष्टदुष्टाः,
[4]क्ष्रं पाथसां जीवनदा इवेभ्याः ॥ १९ ॥

टिप्पणी—१ क्षोदनम् । २ खर । ३ लक्ष्मी । ४ क्षरणे ॥ १९ ॥

[1]क्ष्वेडन्त एते त्वयि भूप ! वीराः,
[2]क्ष्वेडोपमा वैरिकरिप्रणाशे ।

[3]क्ष्विट्टोत्कटश्रेष्ठसुकृष्टिलोकाः,

क्ष्वैंद्यत्सदोभन्दविधानदक्षाः ॥ २० ॥

टिप्पणी—१ स्निह्यन्ति । २ सिंहनाद । ३ स्निग्ध । ४ स्निह्यत् ॥ २० ॥

॥ वीरवर्णनम् ॥

ईदृग् विभो ! प्राणिगणस्त्वदीयो,

वर्ण्यो बुधानामिह वर्णितोऽयम् ।

संयुक्तवर्णैः कविकौतुकाय,

स्वबोधवृद्ध्यै च विशुद्धबुद्ध्या ॥ २१ ॥

॥ इति श्रीखरतरगच्छीयश्रीजयसागरमहोपाध्यायसन्तानीय-
श्रीज्ञानविमलोपाध्यायमिश्रशिष्यवाचनाचार्य-
श्रीवल्लभगणिकृते विद्वत्प्रबोधनाम्नि शास्त्रे
यत्यादि-वीरान्तजनवर्णनो नाम
तृतीयः परिच्छेदः
समाप्तः ॥ ३ ॥

॥ तत्समाप्तौ च समाप्तोऽयं श्रीविद्वत्प्रबोधनामा ग्रन्थः ॥

॥ ग्रन्थप्रशस्तिः ॥

श्रीज्ञानविमलोपाध्यायानां शिष्यैर्विनिर्ममे ।

वाचनाचार्यधुर्यश्रीश्रीवल्लभगणीश्वरैः ॥ १ ॥

विद्वत्प्रबोधनामाऽयं ग्रन्थो विद्वत्प्रबोधकृत् ।

स्फूर्जच्छ्रीबलभद्रे श्रीबलभद्रपुरे वरे ॥ २ ॥ युग्मम् ॥

विद्वद्गोष्ठ्यां विशिष्टायां सञ्जातायां प्रयोजनम् ।

एतद्ग्रन्थस्य मेधाव्यभिमानोन्मथनाय वै ॥ ३ ॥

संयोगिवर्णं निगृणाति विद्वान्, यो यं तमादौ च विधाय विद्वान् ।

दिव्येषु पादेषु चतुर्ष्वशङ्कः, सद्यः सुपद्यं विदधातु हृद्यम् ॥ ४ ॥

यस्यायमेति सुमुखे सुखेन लभतां स सत्वरं सभ्यः ।

विद्वज्जनेषु विद्वान् सौभाग्यौघं कवित्वं च ॥ ५ ॥

यस्मिन् काव्येऽस्ति यन्नामव्यत्ययात्तस्य सत्वरम् ।

यथोक्तवर्ण्यसङ्ख्याख्या तदा जायेत भो बुधाः ! ॥ ६ ॥

॥ इति श्रीविद्वत्प्रबोधग्रन्थः समाप्तः ॥

॥ श्रीरस्तु सर्वदा कारक-वाचक-लेखकादीनाम् ॥ शम् ॥

परिशिष्ट

एकाक्षर - शब्दकोश - संग्रह

शब्दानुक्रमः

कोषांक	श्लोकांक	
		'अ' अक्षरवाचक शब्द
१	५	शिव, केशव, वायु, ब्रह्मन्, चन्द्र, अग्नि, भानु. पा० ५. सानु ।
